1272.

M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. 5816

Title: Nyāya
a book on

C

	Some	Nyāya works	Title
			Author
			Editor
			Year, Vols.
			Publisher
581b	Begins & ends abruptly		Remarks

वह्निमद्वृत्तिकत्वात् पृथिवीत्वादिसमानाधिकरणस्य तु न्यूनवृत्तिजलादेस्तदवच्छेदकावह्निमद्वृत्त्यभावप्रतियोगितात्। साध्यव्यापकानां संदेहे तु उपाधित्वा
णाय साधनतावच्छेदकभिन्नेनेति तदनवच्छेद्यार्थकमित्याहुः। ननु सर्वत्रैवोपाधौ सर्वेषामुपाधीनां साध्यसंबंधावच्छेद्यम इति न नियमः। अयं पक्षसत्त्वो मूर्त्तत्वादि
त्वादावुद्भूतरूपवत्त्वादेस्तदसंभवादित्यत आह अत एव चतन्नेति। यत एवोद्भूतरूपवत्त्वादेस्तथात्वसंभवोऽत एव तत्र तादृशनियमवादिमते इदं लक्षणमिति
साधनाव्यापकत्वमिह साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं। तादृशसाधनासमानाधिकरणस्य पर्यवसितं तेनोपदर्शितोद्भूतरूपवत्त्वा
दिष्वदोषः। अयं पक्षस्त्वो द्रव्यत्वादित्यादौ घटत्वादावतिव्याप्तिः साध्यव्यापकत्वेन विशेषणे च स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तिरत
उक्तसाधनावच्छिन्नसाध्याभावसंबंधिनि विद्धस्य साध्यसंबंधस्यावच्छेदकभेदं विनानुपपद्यमानत्वावच्छेदकीभूयोपपादनमुपाधिफलं तदसमर्थानां चोपदर्शि
तोद्भूतरूपवत्त्वादीनां नोपाधिभावः संभवतीत्याह। व्यभिचारादिति। व्यभिचारः सपक्षविपक्षवृत्तित्वं अथ विपक्षगामित्वरूपव्यभिचारोन्नयनमेवोपाधिफलं तत्रोद्भूतरूपवत्त्वा
दीनामप्युक्तीत्यत आह। अत एवेति। यत एव साध्यसंबंधितावच्छेदकरूपं व्याप्तिः सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं तत्साध्यसंबंधितावच्छेदकं अत एव स्वसमनीयवह्निनिस्व
समानाधिकरणो व्यभिचारादिति हेतोः स्वनिष्ठसाध्यसंबंधितावच्छेदकरूपलक्षणव्याप्तिसंक्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्यैस्तु मन्यत इत्याह। अत एवेति। साध्य
न्यूनवृत्तेरुपाधिव्यवहारं दूषकतौपयिकरूपस्य बाधमन्यथा उपाधिपदस्य योगरूढित्वव्यवस्थापनेन निराकृते। लक्षणांतरमिति। लक्षणं दूषकतौपयिकं रूपं। साध्येतीत्यत्र
साध्यव्यापकत्वमात्रं विवक्षितं तावतैव साधनवन्निष्ठव्यतिरेकेण साध्यव्यतिरेकोन्नयनसंभवात् साधनवन्निष्ठाव्यापकनिरूपसाध्यसामानसंबंधनिरूपितसिद्धावर्थात्सा
ध्यनिवृत्तिः सिध्यतीति पक्षांतरप्रदर्शनायपरं तथा विशेषोक्तिः। हृद्यासाध्यन्यूनवृत्तेरुपाधिव्यवहारं निरस्यायोगेनाधिकवृत्तेस्तं निरस्यति। विष्टमेति। पक्षवृत्तिनिमित्तयोगिकं

व्यभिचारोन्नायकत्वमेवेत्येवकारेण योगनादं सूचयति। उपाधित्वं· उपाधिपदप्रवृत्तिनिमित्तं· उपाधिता· उपाधिपदवाच्यता· योगाद्दूरे तुलाद्यवात्साध्यव्यापकता
मात्रे रूढिरिति भावः॥ ॥व्याप्तिस्वरूपं निरूप्य पूर्वमतनिराकरणपूर्वकं स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं शङ्काकरमेव तमुपदर्शयति। सेयमित्यादिना। दर्शनानां यत्ये
कं वा हेतुत्वं मिलितानां वा मिलनमपि स्वरूपतो व्यापारतो वा· आद्ये दर्शनानामिति। द्वितीये आश्विति। क्रमिकाणामपि स्थिराणामस्थिराणामपि सहोत्पन्नानां मिलितनमत्ती
त्युभयमनुपपन्नं· तत्तीयमार्गं कानिराकृतेन चेति। व्यापकस्य साध्यसामानाधिकरण्या। त्रिकाया व्याप्तेः साध्यसामानाधिकरण्यांशस्य प्रथममेव गृहीतत्वादगृहीतव्यापकत्वां
शग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्वं वाच्यं· तच्च न संभवति भिन्नविषयत्वादित्याह। समानेति। व्याप्त्यग्रहीतमेवं तन्न द्वयं तत्तु वैशिष्ट्यावगाहीति भावः।
न तथा। न व्याप्तिग्राहकं। व्यभिचारादर्शनं व्यापारः तत्सहकारि व्यभिचारादर्शनसहचारदर्शनसहकृततर्क एव व्याप्तिग्राहको भूयोदर्शनं तु क्वचित्तर्कस्य रंतो उपयुज्य
ते इति निर्गलितं नैयायिकमतमाशंक्य निराचष्टे। न चैवमिति। जागमात्रस्येति। तथा च तन्मूलको व्याप्त्यनुग्राहकतर्कः विनाशी इति भावः। नहीति। न च व्याप्तेः प्रत्यक्षसंपत्तिकै
हेतुत्वं तु स्मरणमिति न व्यभिचारावकाशः। विनानुभवं स्मरणस्यायोगात्। न च जन्मान्तरीणास्तु जन्मान्तरे विपर्ययानुयोगतादवस्थ्यात्। अनादित्वेन च परिहारः पक्षो विवे
चिष्यते· न चेति। मानाभावात्तर्कस्य च हेतुत्वासिद्धेः। यदि चागृहीतस्याग्रहीतप्रत्येव निसंसर्गस्य ग्रहस्य सत्त्वेति प्रसंगस्तदप्यत्रोपाधि नि तद्ग्रहो मम्यतां तत्तु सामान्यत्वेने
त्याह। नत्विति। साध्याव्यापकत्वं साध्यसमानाधिकरणाभावप्रतियोगित्वं तद्ग्रहस्य साध्याधिकरणोक्तव्यक्तिवृत्तितया प्रत्यक्षमात्रस्य न तादृशव्यक्तं न तथ्यं द्विनानसंभवती
ति भूयोदर्शनापेक्षा तदाहितः संस्कारो यद्विहितदृष्टिमात्रस्य सहकारी मनसोपि वा· आद्ये तद्व्यापारं विनेति। द्वितीये नापीति। विशेषासाध्यसाधनसंबंधग्राहकातिरिक्ता
नपेक्षग्राहकत्वात्। उपाध्यभावग्राहकस्यापेक्षणीयत्वादिति द्विनिरस्यति। तथाहीति। उपाधिस्मरणादित्यादि नन्वेवमस्त्वनिष्ठत्वादिहेतुकानुमितिर्मस्वादुपाधिप्रमाणानुपलं

भविरहादत आह। तत् व्यवहारेति। तथा च तत्र व्यवहारस्य हेतुरेवानुमितेरपि हेतुः। तच्चोपाध्यभावत्वेन ज्ञानं· उपाधिस्मरणादित्यादिकं तु तत्कारणप्रदर्शनपरं· अभा
वत्वं चेदमिह नास्तीति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेषोतिरिक्तपदार्थो विशेष्य दूनतं। एवं चोपाध्यभावत्वेन ज्ञाने अधिकापेक्षानवस्थाम इति भावः। व्याप्तिस्वरूपे सं
शयाभाव आपाद्यते निरुपाधिसंबंधत्वरूपव्याप्तित्वेन वा। आद्ये इष्टापत्तिः। द्वितीयमपि किं उपाधिस्मरणादिकं विना तत्समवधाने सति वा संबंधग्रहे। आद्ये किंविधमानइति·
तथा च तद्ग्रहमात्रं न तु तद्भावत्वेनापि ग्रह इति। समानप्रकारकेति अपाभावात्संशयो नानुपपन्न इति भावः। द्वितीये तान्प्रमाणप इति। प्रत्यक्षेति। सत्त्वपाधिस्मरणादावि सा
दि। न चाव्यापीति। सर्वत्र तदभावादिरित्यर्थः। अवगतइति। स्वरूपकथनमात्रं। महानसद्रव्यसामिश्रित्यादि। महति वा पोयोऽव्यापोज्ञो द्रव्यसामान्यतद्वतोरिवयोऽप्यवद्भो तादृश
प्रतियोगित्वसामान्यतद्वतोरप्यसंजातयोन्याभावयोर्व्याप्यत्वादिति भावः। न प्रतियोगितावच्छेदकमिति। न धूमसामान्यसमानाधिकरणतादृशात्यंताभावप्रतियोगितासामान्यावच्छे

दकमित्यर्थः। अर्थे साधनाव्यापकव्याप्यत्वाभावः साध्ये धिकरणस्वरूपमेव। एवं साधननिष्ठसाध्यसंबंधे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोपीत्यत्र तथाप्यनेन रूपेणाज्ञा
तव्याप्तिरनुमितिं गतद्रूपविशिष्टानस्य कदर्शनगम्या· सामानाधिकरण्यमात्रे प्रत्युत यथाभावं न वयं ग्राह्या भ इत्याशयेनाह। किं चेति। विशेषणज्ञानमसाध्यत्वात्तत्सामग्री साध्य
त्वाद्वा। न चेति। उपलक्षणमेतत् उपाधेरप्यसाधिसंभवादुपाधिसामान्यतद्भावं त्वादिसामान्यतद्भोविधास्वतान्योन्याभावयोरप्यनयाप्रस्यतेन गृहीतुमशक्यत्वात्·
न च योग्योपाधिव्यतिरेकग्रह एवानुमानांगं। अयोग्योपाधिश्रुते व्यनुमितिप्रसंगात्· यथाश्रुतं दूषयति। एतेनाकृमित्यादिना व्यभिचारस्यादि। अत्र प्रत्यक्षे तथास्य संशयस्याविघे
तिवंधकत्वमात्रं व्यभिचाराज्ञानकारणतयाभिधानं· अन्यथा पुनरस्यावरणत्वे नेतरकारणमेलत्वरूपासामग्री प्रतिबंधिकावोध्या विवेचितं चेदं प्रत्यस्मत्कृतदीधितौ। वस्य
ने चाधिकं उपरिष्टात्· अत्र च यपि साधनगोचरसाध्याभाववत्वनिश्चयाभावो हेतुरिति न युक्तं। केवलान्वयिनि व्याप्त्यप्रसिध्याग्रहाप्रसिद्धेः। खंडशः प्रसिध्या कचि

श्री

तादृशाश्रमस्तेभवेपि सर्वत्र तथात्वे मानाभावात्। अत एव साध्यतावच्छेदकगौरवस्य साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहेपि प्रयोजकः। सकलसाध्यतावच्छे-
दके तादृशग्रहे मानाभावात्। तथापि साध्यतावच्छेदके तत्तद्रूपीयतादृशावच्छेदकत्वग्रहस्य विषयतया ऽभावः तद्विषयग्रहाभावो वा नत्वगृहीतरूपीयव्याप्तिग्रहे हेतुः। वस्तुतो व्या-
प्तेः साध्यसाधनभेदेन भिन्नतया विशिष्यैव कार्यकारणभावः तथा च यत्र साधने साध्याभाववद्वृत्तित्वं साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगितावच्छेदकमित्यादिकमे-
कविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं। तत्र यथायोग्यं तदभावः प्रकृतनिष्ठव्याप्तिग्रहे हेतुः। अत एवैकविधव्यभिचारग्रहविरहेपि अन्यविधव्यभिचारज्ञाना व्याप्तिधीवि-
रोधः। एवं च क्वचिद्व्यभिचारज्ञानस्याप्रसिद्ध्या तदभावस्याहेतुत्वेपि न क्षतिः। प्रसिद्धायाः साध्यानवच्छिन्नाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः समानविषयतया तदभावबो-
धविरोधित्वात्तद्विरोधेन तु तथात्वकल्पनं ~~कल्पनं~~ नेवार्यं वा रयामः। यदि तत्तत्त्वकारादिविशेषनिवेशेन विशेषेण पर्यवसेदिति दिक्। व्याप्तिश्च धूमादिव्यापकवह्निसमा-
नाधिकरणवृत्ति धूमत्वादिकं। तादृशसामानाधिकरण्यमात्रस्य च वह्निसाध्यकत्वाज्। तत्र च व्यापकत्वांशग्रहे व्यभिचारग्रहः समानाधिकरणवृत्तित्वांशग्रहे च विशेष-
णतया सामानाधिकरण्यग्रहो हेतुरिति मन्तव्यः। साध्यसंबंधितावच्छेदकरूपवत्त्वलक्षणव्याप्तिग्रहे विशेषणतया संबंधग्रहो हेतुरित्यपि केचित्। यत्तु विरुद्धे सह-
चारभ्रमेण व्यापकत्वभ्रमात्सामान्यत एव सहचारज्ञानं हेतुरिति तन्न। असिद्धत्वात्। विरुद्धेपि व्यापकत्वसामानाधिकरण्ययोर्ग्राहकसामग्रीक्रमयोगपद्याधीनग्रहणक्रम-
योगपद्यं न तु मिथः कार्यकारणभाव इति। इदं पुनरवधेयं। यथा विद्यमानमपि वह्नित्वे व्यवहितत्वविप्रकृष्टत्वसमादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वेन गृह्यते अभावदे-
शाविप्रकर्षादिना ग्राहकाभावात्। तथा धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्वेप्यग्रहसंभवात्। नानुपलब्धेः प्रतियोगिसत्वविरोधित्वादिलक्षणायोग्यतेति न त-
त्सामान्याभावो लौकिकप्रत्यक्षगम्यः। परं तु कथंचिद्विरोधादिस्फुरणाद्धूमत्वादौ गृहीतो धूमवन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्यादया गृह्य-

ते। अत एवानुमानादिना व्यभिचारग्रहेपि न व्याप्तिधीः।। निर्णीतव्याप्तिकसाधारणो व्याघातविशेषजन्यो पनीतभाने संशयादिसाधारणस्तन्निश्चयाज्ञानो वा विपरीतज्ञानमा-
त्रस्सैव प्रतिबंधकत्वात्। तत्र धूमादौ देशान्तरे वह्नित्वसंभावनाविरहादिवशात् गृह्यमाणो वन्ध्याद्यभाववद्वृत्तित्वाभावो धूमत्वाद्यवच्छेदेन गृह्यतेऽतो धावादित्यपि च यदिति। कु-
णाशंतत्समादिपदार्थसार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलंभमानो अवश्यमितेषामन्यतमं कारणं धूम... वधार्य संदिग्धे किं मे तानि सर्वाण्येव कारणानि किं स्येस
वा कानिचित्तथा कानिचिन्नेति। तत्र च यस्य व्यतिरेकेपी तरेभ्यः विधेभ्यो धूमोत्पत्तिमनुपलभते तस्यैव हेतुत्वमेवावधारयति। यथा तृणमादेः यस्य च व्यतिरेके तादृशापरस-
कलान्वयेपि धूमानुत्पत्तिं पश्यति तस्य च कारणत्वमेव निश्चिनोति। यथा वह्नेः तत्र च कारणत्वसंदेहो विरोधितामात्रस्य निवर्त्तनेन तर्केणेत्यमाह।। धूम इत्यादि।। अत्र तु सं-
धेय व्यावय्य कार्यकारणभावग्रहः तदधीनत्वाद्व्याप्तिबुद्धेः सामानाधिकरण्येनान्वयव्यतिरेकग्रहाज्ञापमानस्य तथैव हेतुहेतुमद्भावग्रहस्त्वतः तस्यैव व्याप्तिपरिच्छे-
दकत्वात्। विपर्ययेपि तर्को तिमात्रपर्यवसायिनश्च तर्कस्य तदभावकोटिकशंकानिवर्त्तकत्वं। अन्यथा धूमो यदि वह्निजन्यजन्यो न स्यात् जन्यो न स्यादित्यादेरपि तथात्वा-
पत्तेः। तथा पर्यवसायित्वाच्च क्वचिद्विशेषतो व्याप्तिसामान्यतोपि क्वचित्पक्षधर्मताबलात्तत्तत्संपृक्तपेवात्र वन्ध्यसमवहिताजन्यत्वेन पक्षो विशेषणीयः। विशेषणावत्त्वेनोपस्थि-
ते विशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलंबनत्वात्तन्नोपस्थितिविरोधितावच्छेदकत्वेनोपस्थितिशंकाह्वयमध्ये निरसनीयं। वस्तुतो वन्ध्यजन्यमपि सन्निहितसमवहितजन्यं वन्ध्यसम-
वहिताजन्यं संभवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहितजन्यत्वं वाच्यं। तथा च घटादौ व्यभिचारवारणाय धूमकोटिप्रतियोगिविशेषणतार्थकं सत्यन्तं। अजन्ये जन्ये च
नान्तरीयकवह्निके व्यभिचारवारणाय जन्य इति। तदेतत्ससंवन्ध्यसमवधानकालीनवह्नित्वसमवधाने तदपायकारणजन्यत्वं तथाविधपावककारणकत्वमिति यावत्। तथा
च वन्ध्यसमवहिताजन्यत्वेपि वन्ध्यसमवधानकालीनवह्नित्वसमवधानेन पावककारणको न स्यादिति पर्यवसितोर्थः।। यत्तु नान्तरीयकवह्निके व्यभिचारवारणाय प-

दककोटावेव विशेषणांशस्य संनतार्थः। स च वन्ह्यधिकरणसामग्र्यजन्यत्वमिति। नन्वेवं प्रागुक्तदोषः। अत्राप्याद्यशंकाद्वयं पर्यवसितम्। तृतीयाद्युत्पादकाप्रसिद्धि-
पर्यवसायिनी। अथ वन्हेः। वह्निशून्यात्। तदुपादानमिति। करणत्वस्य तदीयकार्यप्रयोजकतातात्पर्यं। तादृशान्वयव्यतिरेकानुविधानबोधपरं वा। अथैतन्मपि व्यभिचा-
पदं तत्सम्भेदाभावेऽपि सादेः शंकाप्रतिबंधकत्वे मानाभावात्। कारणतावच्छेदकतत्कालीनत्वाच्च। यद्यपि चेतावता धूमत्वावच्छिन्नप्रतिबद्धजनकत्वेनापादानिवृत्त्या[illegible]
येन वैकल्पिककारणतायामपि तथात्वसंभवात्। तथापि विशेषणकार्यकारणभावग्रहत्वर्केण तद्विशेषशंकायामपनीतायां जायमानः सामान्यव्यभिचारनिर्ण-
यानुगततादृग्विशेषग्रहणीतद्वानुपपत्तिनिलायप्रवृत्तिसंधानादिवशात्सामान्यस्य एवं तत्पदच्छिन्नत्वाभावगोचरौ च तथैवान्वयव्यतिरेकौ। फलबलेन च तादृशवादितानधूम्या
या एव सामान्यव्यभिचारशंकायाः प्रतिबंधकत्वं कल्प्यते। अपरे तु। धूमत्वावच्छिन्नस्य वन्ह्यजन्यत्वेन जन्यत्वविशिष्टस्य पक्षात्कृतस्य वन्ह्यसमवहितात्जन्यत्वस्य व्यतिरे-
क एवापादनीयः। तच्चोक्तन्यायेन तादृशवह्नियुक्तकारणकलापजन्यत्वग्रहेणातद्व्यतिरेकजन्यत्वशंकानिरासात्। वह्निविरहेऽपि निधूमिताप्रयत्नेव तादृशसमूहस्य
धूमजनकत्वसंदेहस्य च तथाविधानुमानानुसारदर्शनेनेवापोगात्। तादृशस्थले यद्वा चिह्न न्हिकविच्छेत[illegible]दोषाद्धजनकत्वस्य संभावनाया च चिह्नमानुसारप्रयोजक-
त्वेनावधृतस्य वन्हिविरहस्थले तथाविधसमूहसत्वे धूमानुत्पत्तिसामान्यप्रतिबंधाधानात्प्रयोजकत्वनिर्णये मापन्नयानमनसे वृथ्यर्थः। वन्हेः वह्निसमवहितस्य। उपा-
दानं। अत्र च नियमेन वृद्धिधूमस्य वन्ह्यसमवहितानुपादानस्य प्रयोजके तदजन्यत्वज्ञाने पर्यवसायी वह्निसमवहितोपादानत्वप्रयोजके तत्त्वतात्पर्यं। पर्यवसितन्वयव्यतिरेका
व्यतिरेकानुविधायित्वस्य तन्मेव विशेषदर्शनं तया शंकाप्रतिबंधकं तदेव तर्कध्युक्तं तदिदमुक्तं यदि दृष्टग्रहीतान्वयव्यतिरेकं हेतुं विनेति तत्र चाहा कि कस्मात्
तद्विधानस्य व्यभिचारित्वात् नियतस्य चोक्ताभेदसंपादकत्वादिति वदंति। नवीनास्तु केचित्तु कार्यकारणभावग्रहानंतरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशंका

राम

निरासार्थमयं तर्कः। तथा च धूमो यदि वन्ह्यनाधिकरणवृत्तिः किंवा सत्साम्यजन्यत्वे वह्निसामानाधिकरण्यप्रसंगात्सत्स्वात् वह्निजन्यो न स्यात् वह्निजन्यो न स्यात्। अपला
सन्न स्याज्जनकताकृतादृशजन्यत्वं च प्रसत्तसत्यान्तरव्याप्तिर्वह्निस्थलेऽपि धूमानुत्पादादिनाग्राह्यमिति। इदमेव च वचोभंग्या परेऽपि विकुर्वंति। धूमो यदि वन्ह्यनधिकरणदे-
शानुत्पत्तिकत्वे सति वन्ह्यधिकरणदेशोत्पत्तिको न स्यात् जन्यो न स्यात्। तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिप्रतिवह्निसंबंधाभावस्य प्रयोजकत्वे धात्वेऽप्युपस्थितत्वा-
लाघवाच्च तादृशसंबंधाभावस्ये प्रतियोगितावधारणादिति वदंति। तच्चिंत्यम्। मिश्रास्तु पर्वतप्रतिव्याप्तिग्रहोपायेषु दर्श्यमानेषु व्यभिचारशंकानिरासहेतुत्वेनोपदर्शितं तर्कमूलमये-
थित्स्वादिशंकोद्भावकं तत्प्रतिव्याघातोपदर्शनमेवं शंकिष्टाः। तथाहि तत्तज्जलाधि[illegible]कारणेन चेतव प्रवृत्तपोच्यात्त्वन्यस्य[illegible]हिसंभवतिस्य वन्ह्या-
दिकमिति निषादुः। तच्चेति। तद्व्यभिचारादर्शनं व्यभिचारज्ञानसामान्याभावः। योग्यतादिसंदेहेऽपि प्रत्यक्षादिनाऽप्यनिश्चयात्। ततस्तर्कस्वरूपमिस्रपिकेचित्। ननु युक्तितोव्या-
प्तिसत्वे तत्कोमासात्वमात्र मपोह्या रात्त्वसादा प्योव्यभिचारस्य तत्राह। विशेषदर्शनेति। तथाच यथा तत्स्वबोधतरभावव्यहिस्यकत्वेन सत्वासत्वे तथा तर्कस्यापीति
। अत्र च सत्त्वादिसंपादकेधर्मिणो वोध्यादिमत्त्वे वोध्यादिमत्व मिथःसंनिकर्षे वा तत्स्वरूपलाघवात्। तर्कस्य व्यभिचारेण हेतुताधाः स्वरूपमेव दर्शितं तावच्च। अथ विपरीततर्का-
नोत्तरपक्षस्य तन्निवर्तकत्वेन विशेषदर्शनस्य हेतुत्वं तच्च तर्कस्यापीति चेत् तावदाय तत्तथा। तथाप्यन्यत्र धूमसामान्य प्रयोजकादेव तत्सामान्य रूपप-
क्षो ततत्स्यापि विशेषतः कारणत्वं योग्यात्उक्तं च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वमतेस्वर्वत्र विशेष्यसंबद्धा संबंध्य विशेषणज्ञानमेव प्रमाजनकम-
ति वदंति। तत्र प्रमाणोति। इदमनादिसिद्धं व्यवहारनुकूलप्रयोजकत्वमभिप्रेत्य परार्थाभिप्रायेण वा। अनुमानता न। व्याप्तिग्रहाधीनप्रवृत्तिकत्वात्। व्यभिचारशंकेति। हारेण
चक्रारेणानान्यथासिद्धिरिति भावः। अनुमानमात्रे मिति। अनिश्चितसाध्यपक्षके सर्वत्र संभवितात्पक्षे साध्यनिश्चये नुमानवैफल्यात्। उपाधित्वेन। स्वव्यभिचारेण साध्यव्य

भिचारोन्नायकत्वेन। अनुमानमात्रोच्छेदकताज्ञानमेव साध्यव्यापकताबुद्धिविरुद्धं ध्यादिस्पर्शं साह। अपि चेति। कस्य द्वीति। प्रथमेत्यादि। त्वन्मते तु नाघातोऽस्यार्थादि
नारूपादिसाधने शब्दत्वादिकं विशेषणासहेपेणावातह्रेत्यंतमुक्तमाशीति। प्रतियोग्यसमानाधिकरणत्वादिविशेषणविरहेणालापवात्। अथ संयोगाभावस्ये
व संयोगवद्वृत्तेरपि हेतुसामानाधिकरण्यग्रहेऽनुमितिदर्शनात् तत्रापि तदवच्छेद्यं निवेशनीयमिति फलाय। न चैवं प्रतियोगिसामानाधिकरण्याद्यनुप
स्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेऽप्यनुमितिर्न स्यात्। न च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानानां वा हेतुसमानाधिकरणा
भावानां प्रतियोगितावच्छेदकत्वाभावग्रहो हेतुरिति वाच्यम्। तादृशाभावग्रहो हि न हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन रूपेण प्रतियोगिस
मानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसंभवात्। नापि प्रातिस्विकरूपेण ज्ञानसहस्रेणापि संप्रसंभवात्। नापि रूपान्तरेण वह्नित्वावच्छिन्नप्रतियो
गिताकाभावस्य धूमसामानाधिकरण्यभ्रमेऽपि वह्नित्वावच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ज्ञानादनुमितिप्र
संगात्। न च हेतुसमानाधिकरणत्वेन ज्ञायमानानामिति वाच्यम्। वह्नित्वे धूमसमानाधिकरणाशेषाभावप्रतियोगितावच्छेदकत्वभ्रमेऽपि उक्तरूपेण तथाग्रहसंभवात्। धू
माधिकरणतानवस्थितो वह्नित्वेऽसम्भवादेवोक्तादृशभ्रमोत्पादे विरहसम्भादेरिव वह्नेरप्यननुमानाच्च। एवं वह्नित्वावच्छेदेन धूमत्वाभावभ्रमदशायां धूमत्वप्रतियोगिकावह्नि
नरप्रतियोगिकाभावपेधूमसमानाधिकरणत्वभ्रमावास्याप्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहेऽपि। मैवं। प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगि
तावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहविरोधित्वेन तद्बुद्धीनां वानुगमात्। विरुद्धबुद्धिश्च सामान्याभावबोधोपि सामान्यघटितविशेषवत्त्व
बुद्धिः। ससांहि घटो नास्तीति बुद्धौ नावच्छिन्नीलोघटो नास्तीति बोधानुदयात्। न [illegible] कस्य हेतोः तद्धि प्रतियोगि

मत्वबुद्धिं प्रति तदवच्छिन्नाभावबुद्धेर्विरोधित्वात्। अवगाहते च नीलघटवत्त्वबुद्धिरपि घटत्वविशिष्टत्वं तत्। अत एवावच्छेदकतत्त्वयोरन्योन्याभावबोधयो रूपर्श
यत्तः हेत्वाभासे चैवं समाणारीतिरिहाप्यनुसंधेया। यदि च साध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वादिग्रहानामनुमितित्वराताद्दृशावच्छेदकत्वादिग्र
हाविरोधित्वमपि निवेशनीयम्। अन्योन्याभावस्य व्याप्यवृत्तित्वपक्षे तु सुगमं हि विशेषणदानमिति। सत्यं। तथाप्यन्योन्याभावे प्रतियोग्यवृत्तित्वस्यैव विशेषणत्वं
। न वा प्रतियोगितावच्छेदकसंबंधभेदादभावनानात्वमिति यथाश्रुतग्रंथानुरोधिनः। अपरे तु। अन्योन्याभावगर्भव्याप्तेरेकतराग्रहेऽप्यन्यतरज्ञानादनुमि
नेराशुभविकत्वात्तदुभयज्ञानमेव हेतुः। इंद्रियसंयोगादिवद्विविधव्यापकार्यकारणभावान्न व्यभिचारः। प्रतियोग्यवच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्याव
गाहितेऽयं रूपविरोधित्वेन व्याप्तिबुद्धेः रूपत्वेनोपस्थितोऽभावो धर्मितागृह्यमाणः साध्यवत्त्वबुद्धिविरुद्धेति योग्यमनीयाः। प्रति धर्मीत्यस्य साध्यतद्वतोः स्व
तान्योन्याभावग्रहो साध्यवत्ताबुद्धिं। केवलान्वयिस्थले च न मत्पक्षेऽवत्तद्धस्य कथंचित्प्रसिद्धिरिति न क्षतिः। साध्यतावच्छेदके साधनसमानाधिकरणात्यंताभावप्रति
योगितावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वावगाही च यो ग्रहस्तद्विरोधित्वं साध्या
भाववद्वृत्तित्वसाध्यवदन्यावृत्तित्वोभयावगाहिग्रहविरोधित्वादिकं वानुगमकं वाच्यम्। प्रसिद्धिः पूर्ववत्। अधिकं हेत्वाभासे वक्ष्यमाणरीत्या बोध्यम्। ग्रंथस्तूपलक्षणपरः
। अनौपाधिकत्वमात्रस्यावच्छेदापत्तेः यद्रूपतिअनौपाधिकत्वं तु न लक्षणमिति नितिवदंति। व्यभिचारज्ञानस्य व्याप्तिधीहेतुत्वात् व्याप्तिग्रहप्रतिबंधकग्रहविषयत्वेन
व्यभिचारस्याभासत्वं सोपाधित्वज्ञानं तु न साक्षात् व्याप्तिधीविरोधिविरोध्यविषयकत्वात्। किं तु व्यभिचारधीद्वारा तु वक्ष्यते चानुमितेस्तत्करणज्ञानस्य वा हेत्वाभासादि
रोधिन एवाभासत्वमिति। निरूपाधित्वज्ञानं तु न व्याप्तिधीहेतुरन्यथाभावात्। तथात्वे च उपाधेराभासतायोगाच्चेति। इदं तु नरिहावधेयम्। यदन्योन्याभावस्याव्याप्यवृत्तित्व

२६

प्रतियोग्यवृत्तित्वविशेषिततद्वृत्तिलक्षणस्य संयोगादिसाध्यके व्यभिचारित्वापत्त्या तिः । संयोगस्यान्योन्याभावस्य केवलान्वयित्वात् । अथ व्याप्यवृत्तिसाध्यके स्वव्याप
कसाध्यसामानाधिकरण्यमेव व्याप्तिः । अव्याप्यवृत्तिसंयोगादिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्वसामानाधिकरण्याभावेन न तादृशरूपविशिष्टावच्छिन्नप
तियोगिताकान्योन्याभावेन वा स्वसामानाधिकरण्यमिति चेत् । स्वत्तिस्वसं जन्यत्वानविषयत्वादिकेवलान्वयिसाध्यके तु का गतिः । अथ स्वाधिकरणयत्किंचि
द्वृत्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकं साध्यवत्त्वकत्वं तद्धर्मविशिष्टयत्किंचिदधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगिताका
न्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वेस्तितद्धर्मविशिष्टत्वं वा एतिचेत् । अत्र किं यथाकथंचित्संबंधेन हेत्वधिकरणवृत्तित्वं विवक्षितं साध्यतावच्छेदकसंबंधे
न वा । आद्ये गगनस्पंदत्वादित्यत्रातिव्याप्तिः । गगनत्वस्य स्वरूपसंबंधेन स्पंदवृत्तितया तद्वृत्तस्पंदनिष्ठतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वात् ॥ द्वितीये समवाये
न जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः । जातिमन्मेयव्यक्तिनिष्ठतादृशान्योन्याभावप्रतियोगितायाः जातिमत्त्वेनानवच्छेदात् । जातिशून्यमेयव्यक्तौ समवायेन वर्तमा
नस्याप्रसिद्धत्वात् · एतेन ग्रहो व्याख्यातः । एवं तथात्वेऽसंताभावगर्भमपि लक्षणं दुर्वचं · तथा हि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणनिष्ठासंताभावेऽआरिगर्भम
व्यापकमेव संयोगादिसाध्यकद्रव्यत्वादौ । स्वाधिकरणयत्किंचिद्व्यक्तिवृत्तिप्रतियोगिकात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिक
रणहेतुत्वमित्यत्रापि पूर्ववत् गगनस्पंदत्वाज्जातिमान्मेयत्वादित्यत्रातिव्याप्तिः । एवं स्वप्रतियोगिनिष्ठाधेयतानिरूपकहेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानव
च्छेदकसाध्यतावच्छेदकावच्छिन्नसमानाधिकरणहेतुत्वमित्यत्राप्युत्पत्तिकालावच्छेदेन जन्यानां द्रव्याणाम् अजन्यानां च पलत्वावच्छेदेन संयोगनिष्ठाधेयतानिरूप
कत्वोपगमे संयोगसाध्यके द्रव्यत्वे कालपरिमाणे च हेतावव्याप्तिरिति दिगिति निष्कृष्टं तत्त्वविजेना । अत्र वदंति । साध्यसमानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियो (गि)

(म)

तानवच्छेदकत्वव्यापकत्वसमानाधिकरणतत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वं समानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेद
कत्वव्यापकसाध्यसमानाधिकरणतत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वकत्वं स्वसमानाधिकरणाः सर्वे ये धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावली
ढसामानाधिकरण्यं । साध्यसामानाधिकरण्याभावव्यापकतावच्छेदकं स्वसामानाधिकरण्यसामान्याभावत्वकत्वं वा व्याप्तिः । अत्र च साध्यतावच्छेदकसंबंधेन साध्या
धिकरणं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं तद्वृत्तित्वद्वयं च केन संबंधेन विशेषणात् । विशेषणतावोध्यमिति ॥ प्रसंगात् सामान्यलक्षणांप्युपपादयितुमाह ॥ व्या
प्तिग्रहश्चेति । केचित् समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतीयधूमे वह्निव्याप्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहं विना स च सामान्यलक्षणां विना नेति कथितव्या
प्तिविशिष्टेत्यादिलक्षणोयोह्यायोप्रीत्याहुः । अत्र च सामान्यं लक्षणं स्वरूपं यस्याः इत्यर्थे सामान्यमेव प्रत्यासत्तिः । सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानं । तच्चा यस्मा
त् । सा चेंद्रियेति । इंद्रियेण संबद्धं धूमादि तत्र विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः । विशेषणतेत्यत्र भावार्थो न विवक्षितः । तत्र विशेषणत्वं प्रत्यासत्तिघटकी
हितौ । संबद्धपदस्यैव वा परंपरासंबद्धतत्संबद्धविशेष्यकज्ञानप्रकारोर्थः । तथा च सैव विशेषणतेत्यर्थः । अत्र च वहिरिंद्रियस्थले लौकिकः संबंधो ज्ञानस्य मनसि इंद्रियजन्यत्वं च नि
यामकं । एवं चाणुत्वेन यत्किंचिद्रूपास्थितावपि सकलाणुगोचरो मानसो बोध इति वदंति । एतेन धूलीपटले धूमत्वभ्रमे तत्र च वह्निव्याप्तिग्रहे तु ज्ञाततादृशधूमत्वेन धूमे व्याप्यत्वग्रहा
द्धूमदर्शनाद्वह्न्यनुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् । किं च धर्मिणि दोषवशान्न यत्र नागृहीतमात्रो नस्मरणप्रकारीभवति सामान्येन गृहीतमात्रेण वा लौकिकसंनि
कर्षविगमेपि चाक्षुषतानापत्तिरिति पराखं । सामान्यं च सखंडाखंडभेदेन द्वेधा । सखंडं चाखंडमेव परंपरासंबद्धं प्रत्यासत्तिः । येन संबंधेन चेंद्रियसंबद्धं सामान्यं तादृशेन
संबंधेन चाधिकरणानां प्रत्यासत्तिरिति । ननु यत्र नानाधिकरणवृत्त्यसंनेएकव्यक्तिघटादितत्त्वाद्यभावादिविषयिणी प्रत्यासत्तिः तत्र तदभाववत्ताधीः न स्यात् अप्रसिद्धत्वात्

ज्ञानानुदयप्रसंगादिति चेन्न। तत्रापि न व्याप्तिज्ञानमूलसत्त्वस्वपरत्वादेरेव प्रत्यासत्ति [illegible] त्वात्। एतदस्वरसेनैव व्याहृतीति
यं पक्षमाह। अतिरिक्तेऽवेति। अतिरिक्ता इंद्रियसंबद्धेतरदेशसामान्यज्ञानात्मिका। अतीतानागतेतराभावासामान्यज्ञानमेव प्रत्यासत्तिः। अपेक्षणीयं च तदिंद्रिय
कारणकतद्धर्मवत्त्वबोधकज्ञानमात्मनः। अत एवाधुनातनप्रदेशे सौदामिनीसंपातजनितेऽपि द्रव्यप्रत्यक्षे चक्षुर्मनश्चाक्षुषो निखिलद्रव्यसाक्षात्कारप्रसंगात्तत्र न व्याप्तिः। इत्थं च
धर्मिविषयकं ज्ञानं धर्मितावच्छेदकविशेषरहितं तत्तु प्रदेशविषयकं ज्ञानं नास्त्य। अत एव वस्तुव्यभिचारंदर्शनमिति दोषो भ्रमत्वादेरपि मानमिति। ततः स्मृतावेति धूमत्समानाधिकर
णात्यंताभावाप्रतियोगिवह्निसमानाधिकरणावृत्तिधूमत्वं। वह्निमदन्यावृत्तित्वं। वह्नित्वं वा धिनावच्छेदकरूपत्वं वा व्याप्तिः एके वचसा सर्वधूमसाधारणीति भावः। व्या
प्तिमानात्वे तु पर्वतीयवन्हेरसन्निकर्षेण तत्सामानाधिकरण्यग्रहाभावो गोऽन्यदीयवह्निसामानाधिकरण्यग्रहे तत्र भानांगीकारेऽभ्रमत्वापत्तिरिति द्रष्टव्यं। गंधादिप्रदेश
पीति। शाब्दानुभवश्चापस्मरणो हेतुहेतुमान्वा कार्यबोधः। नन्वेवं जातिव्यक्तिवादविरोधः। जातौ व्यक्तौ च शक्तिः परं तु जातिविषयत्वेनैव शाब्दव्यक्तिस्मारयति अ
नुभावयति चेति न दर्शादिति तु वस्तुमात्रत्वात्। अतद्रूपाणां विज्ञानवद्बुद्धीहिरणाद्यप्यादि लिङ्गादिपदाभिप्रायेणापद्धीसावेत्यपि कश्चित्। विशेषणतान[illegible]सा
ध्येति। न च पक्षतावच्छेदकज्ञानजन्यतया सिद्धसाधनं। पक्षविशिष्टज्ञानं तत्तद्वीसाध्यमिति सामान्यव्याप्त्याहारात्। अभावत्वप्रतियोगितयोऽप्यनुपस्थितयो
प्रकारत्वात्। वह्निविशिष्टज्ञानत्वेन तद्वह्निविशिष्टज्ञानत्वेन वा न तज्ज्ञानजन्यत्वसाधनाद्वा। विशिष्टवैशिष्ट्यावगाह्युपगमपादः। वस्तुतो विशेषणतावच्छेद
कादीनां युगपदिन्द्रियसन्निकर्षानादृष्टं प्रत्यक्षं अनुमित्यादिरूपत्वाद्रूपेणाप्याप्राहिम्नग्रहात्। अत एवानेकव्यक्तिद्रव्यादिविशेषणतावच्छेदककानुमित्यादौ नत दा
नार्थसामान्यलक्षणादरः। अतिवादडीसारो पक्षे दंडत्वादिना दंडसंयोगवानित्यादौ दंडसंयोगत्वादिना यावत्किंचिद्व्यक्तिज्ञानं कारणं। दृष्टान्ताभावादिति। विशे

श्र

ज्ञानमपि कारणं तन्मतां च निर्विकल्पकमपि सामान्यलक्षणायाः सार्वज्ञापत्त्यात्तस्यात्तदजनकत्वेन तु मतत्वं च यावच्छात्रकारणमिति पदार्थः। प्रसिद्धधूमत्वादिधर्मि
ज्ञानस्य संशयहेतुत्वानंगीकारेऽपि संशयपरत्वधर्मिभानार्थं सालीकार्या। धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वामुपगमे तु विवादात्। तद्धर्मप्रकारकज्ञानस्य
तद्धर्माश्रयप्रत्यासत्तितोपगमात्। अत्र वदंति। प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानं तद्धूमत्वेन वा। आद्ये संशयो सिद्धः। द्वितीये तु धूमत्वावच्छेदेन व्याप्तिग्रहस्येव त
द्विशेषितपापत्तनानुपपन्नः। कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यतानिर्णये विरूपं वायुत्वाभावव्यभिचारि न वेत्यादिसंशयः। नयातिरिक्तसंभावनया तथा
विशेषणतस्योपस्थितानामतिरिक्तानां विशेषदर्शनाक्रांततयाऽतिरिक्तानुपस्थितयेवास्य संशयकरणीयेति वाच्यम्। यतो रूपेऽनातिरिक्तस्य संभावनानुरूपविशेषदर्शना
त्। नाप्यतिरिक्ते रूपत्वसंभावना। रूपान्तररूपद्व्याप्यरसादयश्च न रूपं प्रसिद्धरूपभिन्नं रूपभिन्नं द्रव्यं रसादिवान्तत्सर्वं न रूपं रूपत्वाभावव्याप्यत्वादिविशेषदर्शनेन तस्या
अप्ययोगात्। नेदानीं चोक्तसंशयस्य सर्वजनानुभवसिद्धत्वात्। अतिरिक्तसंभावनायोग्यत्वेनापयोजकत्वात्। तस्मात्तत्रैव धूमे रूपे वा धूमत्वरूपत्वावच्छेदेन व्याप्य
यत्वात् व्यभिचारसंशयो मायुक्तः। यत्तु। सामान्याभावमानार्थं साङ्गीकार्या। तां विना संवकलनत्प्रतियोगिज्ञानासंभवादिति। तन्न। नेत्यभावज्ञानमात्रे लौकिकप्रत्यक्षे
वा प्रतियोगिज्ञानं कारणं। तत्सामान्यलक्षणाया इदंत्वादिवाच्यभाने व्यभिचारान्नानाभावाच्च अत एवेदंत्वादिनोपस्थिते तत्र सोऽभावत्वाभावत्वसंशयः। तेऽभावत्वे
नोपस्थितेतदयोगात्। प्रतियोगिविशेषितत्वेऽज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते। सकलप्रतियोगिविषयत्वं तु नसासिद्धं। प्रतियोगिज्ञानस्य हेतुत्वे प्रतियो
गितावच्छेदकविशिष्टप्रतिकिंचित्प्रतियोगिज्ञानादेव तत्संभवात्। प्रत्यक्षप्रतियोगिज्ञानत्वेन गौरवेणाहेतुत्वात्। न च तदभावबुद्धेर्न ज्ञानत्वेन हेतुत्वात्तथा वत्प्रतियोगि
ज्ञानस्य हेतुत्वमप्यर्थ्यायान्। नानाभावात्। ध्वंसप्रागभावात्यंताभावाः प्रतियोग्यादित्रयप्रतियोगिकाः इत्याग्रहे प्येकैकग्रहादेवत्र्यंता इत्यप्युपगमात्। अंधकारस्त

तेजोविशेषस्याभास्वराभावो न भावरूपस्तु दाघः । यावत्तदभावानामेकत्वासंभवात् । अननुगमाद्गौरवात् । तेजोविशेषत्वादिनानिवेशः स्यादतः साम्यमाह अपि च ह तेजो
विशेषाणामनंताभावप्रागभावानां प्रत्यक्षानुपपन्नमात्रं । प्रागभावप्रत्यक्षेऽपि च प्रतियोगिवृत्तिघटत्वादिप्रकारकं तत्तानसाध्योनं तु प्रतियोगिज्ञानमपेक्षते । अथ घ
टो भविष्यतीति प्रत्यक्षं प्रतियोगित्वविशेषितं प्रागभावमवगाहते । न च प्राचीनानां त्वत्प्रतियोगिनः । तत्प्रतियोगिकत्वावगाहने च भ्रमत्वं । न चानागतं घटे प्रत्यक्षं
न स्यात् । अतः सामान्यप्रत्यासत्त्याघटत्वेनानुभूतस्मृतं च यत्तदालंबनं । न च स्वरूपप्रकारतारूपसामग्रीध्वंसः प्रागभावो वा स्यात् । अन्यदा तत्र प्रत्यक्षमानात् । तस्मात् स्वरूपसत्ताः स्व
रूपेणावगाहनात् प्रामाण्येऽतिप्रसंगात् । आप्तत्वेन गृहीतायाः स्वत्वेनाप्यं । तथा च तदेव तु कालप्रागभावस्यापि भविष्यत्त्वेन कालेन प्रागभावस्य प्रत्यक्षापेक्षापोगा चेति वा
च्यां प्रत्यक्षाकारणकत्वापत्तेरंकापेक्षादेशात् घटते तद्वस्तुं च संघकत्वानुपपत्तेरात् । अनुयोगितावच्छेदकरूपप्रागभावत्वादेः कश्चिद्ध्यवसीतो तादृशेनानुमानासं
भवाच्चेति चेत् भविष्यत्त्वं हि न वर्तमानप्रागभावप्रतियोगित्वं ध्वंसाभाविन्यघभविष्यतीति प्रत्यक्षप्रसंगात् । किं त्वस्य तेन भविष्यतीत्यादेः समानार्थकत्वात् । वर्तमानप्रा
गभावप्रतियोग्युत्पत्तिकत्वं वर्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वं न चेदमध्यक्षमुपत्तेरत्ती द्विप्रत्वात् । इहा घघटो भविष्यतीत्यादौ घतादृशोत्पत्तेर्देशविशेषः
कालविशेषस्याधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमत्त्वात् । अत एव कपालनाशजन्यघटनाशस्य घटाधारात्मकतया प्रागभावत्वस्य पितृकपालेनेह
घटध्वंसो भविष्यतीति बुद्धिः न वा भवनेऽश्वः समुत्पन्नप्रागाणोपरश्वो गमिष्यतिमेत्रे प्रागणोपरश्वो भविष्यतीति धीः । अत्र च धातुनोत्पत्तिः प्रत्ययेन प्रत्ययार्थेन च
धात्वर्थमिष्टं तादृशप्रतियोगित्वं तादृशकालीनत्वं वा । नं स्मृतिनष्टमितिनष्टः इत्यादौ च प्रत्ययेन पथ्यापथ्यमनागतावर्तमानांतीतानां चोत्पत्तिः । तत्सामे वचनकालवि
शेषादिविशेषणत्वेनान्वेति । एतेन ध्वंसोविनाशेके परश्वो नंक्ष्यतीति नष्टे च नक्ष्यतीति व्यवहारः स्यात् । न स्यात् कालस्य विद्यमानत्वात् नष्ट इत्यादिः । न च तद्वातीतकाल

संबंधित्वं वर्तमानत्वं वा निष्ठादेरर्थः । चिरविनष्टेऽपि पूर्वं घटो नष्टोऽधुनाऽवेत्तिव्यवहारप्रसंगादिति प्रत्युक्तं । कर्त्तरि विहितेन निष्ठेन क्तावाप्रथा प्रथमान्ननन्तप्र
तियोगित्वलक्षणाकर्तृत्वमाश्रयः प्रतियोगिस्वप्रत्यक्षकत्तामिधीयते । कार्यदुत्पादरशायां चाभावधीः सामयिकमत्यंताभावमवगाहते । न च प्रतियोगिसमवायिनि
समवायवदेंनात्यंताभावे वर्तमानाभावः । भाविनि विनष्टेवा घटे इह कपाले घटो नास्तीति प्रत्ययात् तन्नत्ययं घटप्रतियोगिकमभावमात्रमवगाहते । यत्किंचित् घटवत्यपिता
दृशप्रत्ययप्रसंगात् । पर्वं तु घटत्वावच्छिन्नप्रतियोगिताकं । न च प्रागभावध्वंसौ न तथा । तं भवतो वाच्यत्वकपालेनतः पूर्वं परं तत्र श्चवहूनां पदार्थानां नष्टत्वादुत्पत्स्यमानत्वाच्च अ
थैवं कपालादौ कथं घटध्वंसादिशून्यतावुद्धिरत्यंताभावप्रध्वंसाद्यविरोधित्वादिति चेत् तत्तद्धिककरणस्वरूपावतिष्ठितादेवतत्तादृग्भावाहत् । इहइदानीं घटप्रागभावइ
ति च प्रत्ययोनसौ चानां । अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययवलेन नाशोत्तिरित्युत्तानं नु प्रागभावः । पूर्वत्वतापूर्वत्वादि [illegible]
[illegible] नाशोत्ति रित्यनंतोन व्यवहारस्यानीतकालवृत्तित्वनउत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिविषयकं एवातत्र । दुःखात्यंताभावस्यस्वस्मिन्नु
तेरकालानुवृत्तिदुःखसाधनध्वंसस्यवाप्यनुद्विष्टक्रियाविशेषप्रवृत्तिरक्ता । मानांतरसिद्धं द्विष्टयोजनमुद्दिश्यप्रमांसः प्रवर्तितेन न तु प्रवृत्तेव नास्ति द्विष्टमिति । अत्र न्नपिनत्स्यादप्रवेग
त्वलाघवालाघवादि प्रतिबंधकत्वेनापि निरसनीयः । तदुत्पत्तिश्चमहाप्रलयानंगीकारे स्वाधिकरणसमयध्वंसानधिकरणसमयसंबंधः । तदुक्तं । अथ तल्लक्षणायोगस्य
सत्तायोगो नविमर्नेतिसूराः समयः । तदंगीकारे तु कश्चिदपि पदीयसमयसंबंधेयत्समयवृत्तित्वस्वप्रतियोगित्वं नास्ति तत्समयसंबंधः । तदधिकरणसमयत्वमित्वा
प्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा । स्थाणुत्वं च स्ववृत्तिध्वंसप्रतियोगिस्वप्रतियोगिकध्वंसाधिकरणसमयत्वं । स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकपावत्स्वंसविशिष्टसमयत्वस्व
वृत्तिभावत्स्वं सविशिष्टसमयत्वं । स्ववृत्तियावदभावविशिष्टसमयत्व स्वस्वपूर्ववर्तियावत्पदार्थविशिष्टसमयत्वं वा स्वपूर्वत्वं च स्वाधिकरणयावत्कालवृत्तिध्वं

सप्रतियोगित्वं जन्यमात्रस्यैव कालोपाधित्वाददोषः। यो यत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिः स तत्कालवृत्तित्वमुत्पत्तिरित्यपि केचिदिति चेत्। नैवमप्यतीपत्तेः किं
चिद्दण्डाकमिति केचिदिति नो वर्णयन्ति। अथ घटस्य सत्तानधिकरणीभूततत्तत्क्षणवृत्तिध्वंसप्रागभावादीनां तत्तत्क्षणवृत्तित्वेन तत्तद्घटजनकत्वं वाच्यं तथा च स्वाघटवादि
कएव प्रागभावः कल्प्यते। स च सत्त्वाश्रय एव प्रतियोगिजनकः इति नातिप्रसङ्गः। इत्थं चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकत्वात् द्वितीयक्षणे तु केपि न
स्थि हितिति चेत्। त्रिचतुरेषैव तत्तत्क्षणोत्पन्नेषु संयुक्तेषु च तत्तदुत्पत्तिप्रसङ्गः। तावत्तत्क्षणवृत्तेः प्रत्येकतियय विरहे कथमुत्पत्तिरिति चेत्। कार्यकुत्तादृशविनाका
रणाविरहमपेक्ष्य घटमात् सामग्रीसत्त्वेपि सतो कार्यसत्त्वाच्च तत्कालप्रागभावात्। तत्र प्रागभावाश्रयघटावयवं तत्तत्त्वेन तत्तज्जनकत्वमिति चेत्। अवच्छेदककोटौ
प्रागभावप्रवेशाप्रवेशयोः कारणतावच्छेदकमानाभावः। घटत्वावच्छिन्नसंयुक्तेषु च कतिपयतन्तुषु नष्टेष्वापत्तेः। न च तत्तत्प्रागभावव्याप्यव्यावृत्तसंयोगानामपि जनकत्वा। क
तिपयतन्तुसंयोगेषु अतीतेषु नागतेषु वा पटस्य तन्तुत्वनिष्ठसंयोगेषु नष्टेष्वापत्तिरिति चेत्। तत्प्रागभावमपेक्ष्य ... न्यथावलानिरूकेन्ध। एतेन नित्यत्वानित्यत्वयोर्व्याख्यानेति। परे तु
न दिहे हानीं घटध्वंसवदिति दिहेदानीं घटप्रागभाववदिति साधारणमेव लोकानां प्रत्यक्षं कल्प्यं तत्तद्दलेन प्रागभावं ... तत्सत्ताकं च प्रत्यक्षोपपत्तौ वर्णयन्ति। अथा
प्यवृत्तेः कार्यस्य द्वितीयक्षणोत्पाद्य ... निर्विकल्पकस्य चतुर्थक्षणे तोत्पत्तिः ... कार्यमात्रस्य तत्तत्प्रागभावस्य च का
रणत्वं वाच्यं तथा च लाघवात् प्रागभावस्य तत्त्वं कल्प्यते। उभयाबाधितान्वयादिहितकलान्यदेशनियमः संयोगादीनाम्। किन्तु अन्येषु सर्वत्र तत्तत्स्वाविशेषणत्वा
विशिष्टहेतुतामुपगमेनैव तत्तद्व्यक्तित्वनियमसंभवे ... तत्तद्धर्मिताविशेषात् नियामकत्वेन प्रागभावः कल्प्यते इत्याहुः। प्रत्यक्षानेच्छाकृती
नां कार्यकारणभावग्रहो न तदुपस्थितिं विना ... तत्काले ज्ञाने ... योग्यविशेषगुणयोगस्य तत्तन्निर्विशेषणत्वात्। अतो ज्ञानानन्तरसाक्षात्कार

वर्तमानत्वादिनेच्छादिजनकज्ञानादिकं गृह्णातीत्यनुपेयतरत्। तत्र पौर्वापर्यपरिचयेऽधर्मित्वरूपप्रहेऽपि कारणत्वग्रहासंभवात्। इच्छाकृत्यत्वत्त्वादेव ज्ञानेच्छ
योः साक्षात्कारत्वानेच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकारणभावग्रहस्यावश्यमुपेयत्वात्। कृत्यनुत्पादस्यत्वे ज्ञानेच्छयोः कृत्यनन्तर
मिच्छाकृत्योः समूहालम्बनसाक्षात्कारस्य ... अनुमानस्य च संभवात्। विप्रलंभस्य च्छेदेन युगपद्द्विंशतिप्रत्यक्षत्वे ... इच्छाकृतिकाले ताभिसादोषविरोधा
द्भागी तेच योगिभिः अभावप्रतियोगितेन समवेतत्वेन च विशेषिततन्त्विशेषितत्वाभावे तत्समवेतत्वं व्याप्यत्वावच्छेदकं न तु एककालगोचरत्वविशेषितं सामान्यलक्षणापावि
गृहीतुमशक्यत्वात्। न तु समानविषयत्वेनापीति त्वादेः तत्। समानप्रकारताभावे स्य प्रयोजकत्वे च विशेष्यतत्प्रकारिकेच्छा कचिन्नेति नियमो न स्यात्। तावृशप्रका
राश्रयएव तद्दृष्टादौ ... इच्छा अनुपस्थिते च संसर्गाग्रहोऽपि नियामकः। वस्तुतो संसर्गाग्रहमपेक्ष्यत्वीयस्य द्विधानुमानेऽसे ... नियामक
मकत्वमुचितं सामान्यतस्तद्दिशयांव्यवस्थितेन तुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात्। अन्यथासमानप्रकारकत्वेन व्यवस्थिते कार्य
कारणभावेऽतिप्रसंगाभंगाय समानाधिकरणमपि व समानविषयत्वमेव पस्यात्। असंसर्गाग्रहादेरवश्यकत्वात् तामपेक्ष्य समानविषयत्वस्यावच्छेदककोटौ नि
वेशोऽपि चलधीयान्। कारणतायष्यार्यत्वपर्याप्ताधीनत्वात् कार्यस्य तथाविधो विशेषः। एतेन रजतत्वप्रकारिकेच्छायां तत्प्रकारकज्ञानसंवादित्वं तदभावोपसहि
तं विसंवादित्वं च प्रवृत्तिरजतभेदाग्रहसहितं हेतुरितिपरास्तं ... इदमपि चकेवादिप्रवृत्तिरजतभेदाग्रहस्यैव हेतुत्वेचित्साच्च दोषाणां रजतभेदग्रहप्रतिबंध
कानामभावमपेक्ष्य लघुत्वात्। अथाहुः। सिद्धत्वबुद्धेस्तु सर्वत्वे त्वेन रूपेणोच्छात्वादयाद् ... तत्प्रकारकत्वावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधि। न च तत्त्रकृते।
तत्त्वेऽदृष्टत्वनैतत्स्यापत्तेंगीकारात्। कथमन्यथा योगिनां साक्षात्कारमात्मप्रसाक्तेनावच्छेकनादाविच्छा। ज्ञानत्वेलोकनादौ नो सिद्धत्वज्ञानादतिरिक्तस्य चास

त्वादिसादिवह्नित्वरमूहनीयं। अथ सिद्धत्वनिश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः। न च सिद्धत्वेन ज्ञाते तत्संभवतीति सिद्धत्वज्ञानार्थं सामान्यलक्ष
णेति चेन्न। विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञाते तद्व्यक्त्येव सामान्यरूपेण सिद्धत्वग्रहसंभवात्। तदेकं ज्ञानद्वयं वेत्यन्यदेतत्। सामान्यलक्षणासहकृतेन प्रसिद्धत्व
स्य ज्ञातुमशक्यत्वाच्च। वस्तुतस्तु सामान्यलक्षणां विनापि अयं कालः स्वत्वप्रागभाववान् न स्वोत्पादकालीनध्वंसप्रतियोगी वा कालत्वात् एतादृशकालत्वा
दित्यनुमानात् सिद्धस्य स्वत्वस्य न हि सिद्धत्वस्य च ज्ञानं सुलभमेव निपुणानामुपपादयिष्यते चेदं शब्दमणौ दीधितौ विवितिकृतं पक्षविवेचने। घटः स इत्यादि। सं
शयसमानाकारो हि निश्चयस्तद्विरोधी घटो न वेति संशयस्य कोटितावच्छेदकघटत्वांशे निष्प्रकारकः। न च प्रमेयवानिति निश्चयस्य तथा। अत एव जातिमानि
ति निश्चयेपि घटो न वेति संशयः। घटत्ववानिति निश्चयस्तु घटे न तथा जातित्वविशिष्टघटत्वमवगाहमानो घटान्यतासंदेहं विरुणद्धि। प्रकृताह तन्निर्विकल्पको घटादि
निश्चयः स्वप्रकृतत्वसंशयस्य सामग्रीविरहादिति। घट इति निश्चयं प्रति घटत्वांशे निर्विकल्पकज्ञानं कारणं। जातित्वादिना घटत्वज्ञानेपि नैतदनुपपत्तिः। सामा
न्यलक्षणायाश्च सामान्यप्रकारकज्ञानजनकत्वनियमात्। विशिष्टज्ञानसामग्रीसत्वात्॥ ॥ इति सामान्यलक्षणा॥ ॥ प्रसंगादुपाधिं निरूपयितुमाह॥ उपा
धीति॥ साध्यसाध्यत्वसाधनत्वेन संभवतोऽतोऽभिमतेति॥ यो यद्व्यापकत्वे सति यद्व्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः। व्यापकत्वाव्यापकत्वे एकरूप
ण विवक्षिते। तेन प्रमेयत्वादिना साध्यव्यापके न्यायकृतादिना साधनाव्यापकत्वेपि नातिप्रसंगः। नन्वपाधेः साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं स
च यावदुपाधिव्यापकव्यापककत्वरूपं नोपाधिकत्वसाध्यदेव यावत्र्व्याप्तव्यापकव्यापकं तदर्थोनतत्तत्स्वोपाधेः साध्यव्यापकत्वग्रहः साध्यनिष्ठव्याप्तिग्र
हादित्यन्यथासिद्धप्रत्यत आह। अनौपाधिकेत्वेति। व्यापकत्वं व्याप्तिनिरूपकत्वं साधनोपाधिकत्वग्रहाद्वहीनव्यानत्वविष्ठव्याप्तितानमप्यनोपाधिकत्वात्तदय

हादित्यनवस्थेत्यत आह। अनौपाधिकत्वेति। अन्योन्याश्रयपदमनवस्थापरमिति न पसंग्रहायः। अव्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह। प्रतियोगित्वं चे
ति। तदधिकरणानधिकरणत्वं तदधिकरणाधिकरणत्वविरोधि प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तद्रहितवृत्तित्वं प्रतियोगित्वमपि करण
त्वेनाभावो विशेषणीय इति तु फलितार्थः। साधनेति। अनयोः संकरोऽग्रे दर्शयिष्यते। पक्ष इति। पक्ष इतरो यस्मादिति बहुव्रीहिः। भावप्रधानश्च निर्देशः। पक्ष
मितस्य तिथ्यावर्तमानी तिथुस्स्यात दहति धर्मवचनस्य विकाश्चिन्। तारास्येन भिन्नत्वव्यापकत्वमिति परमार्थः। अत एवाग्रे एवं नेतरान्यत्वादिति सा
धु संगच्छते। इतरथा तु व्यापकाभाववत्त्वे व्यापकवदन्योन्याभाववत्त्वेपि गमकत्वमाशङ्कनीयं। व्यतिरेके इति। यद्यपि व्यापकाभावस्तु द्वयोर्गमकत्वेन तथा
वैयर्थ्यं न दोषाय न तु व्यावृत्तत्वं तथा चैयर्थ्यमूलत्वमेवाविशेषणांतेयमिति भावः॥ यत्तु ययोर्व्यतिरेके आसितत्पोरेव व्याप्यव्यतिरेकेणोन्नयेपि व्या
प्तिसिद्धिरिति नियमः। इदं तु व्यर्थविशेषणतापाद्यतिरेकव्याप्त्यभावादन्वयेपि न तथात्वात् साध्यव्यापकत्वाच्चायमुपाधिरिति भाव इति। तन्न। अहेतुकत्वप्रसङ्गाद्धेतुक
त्वयोर्व्यभिचारात्। एवमपि संयोगादौ केवलान्वयिनि च साध्ये पक्षेतरत्वव्याप्तितादवस्थ्याद्यवस्थाङ्गत्वेति। तथा च पक्षे साध्यवत्त्वनिश्चये तत्त्वं साध्यव्यापकं त
त्व इति च यथोक्तानन्तरादुपाधिरेवेति भावः। यद्विषयतया ज्ञानस्य प्रतिबंधकत्वं तदेव प्रकृते उपाधित्वं गाह्यं। नान्यदनुपयुक्तत्वात्। न चेदुक्तरूपं न तदा तदनुपपत्ते
न इत्याविग्रहादनुमितिमात्रोच्छेदः इत्यभिप्रायवानाह। अस्तित्विति उपाधिमात्रं इति। सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मतेः। इतरथा तु पक्षान्तरस्थैवोद्वाध्यः।
विपक्षेति विपक्षव्यावर्तकधर्मान्तरविशिष्टपक्षेतरत्वं वारणाय निवेशदपगर्भता। विपक्षव्यावर्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वा
लित्वं तत्त्वं विवक्षितमित्याशंक्य पक्षेतरत्वस्योपाधित्वमनङ्गीकुर्वन्तस्तु मतेनातिव्याप्तिमभिहिता। वस्तुतो दूषकताबीजं नोपजनकरूपवत्तत्त्वमनुपाधिताप्रपन्नम

लक्षणाय च विशेषणोपादानं द्वयमपि न युक्तमित्यभिप्रायवानाह। तथापीति। तावन्मात्रस्य। साध्यव्यतिरेकोन्नयनस्य साध्यव्यापकतामात्रस्य। दूषक
त्वात्। दोषोन्नयनोपयोगित्वात्। अनित्यादिति। तद्दूषकस्येत्यादिः। उपाधित्वाभावेपीति। उपाधित्वानंगीकारेपीत्यर्थः। दूषकताबीजस्य तस्योपाधित्वं दूषकता
बीजं चेन्न व्यभिचारादेर्ज्ञापकत्वेप्युपजीव्यसत्प्रतिपक्षस्य तत्र तज्ज्ञानाधीनत्वेन तदुपाधित्वाशंकते। अथेति। व्यभिचारोन्नायकतया। व्यभिचारस्योन्नायकतया।
व्याप्यतया। अव्याप्यत्वादिना। स्वव्याप्यत्वे। अव्याप्यत्वादि। सत्प्रतिपक्षोन्नायकत्वादिति। व्याप्तिपक्षधर्मतारूपबलसत्वेनैकेनापि बहूनामपि विरोधसंभवात्। बहुत्वस्य
बलत्वात्। प्रत्यक्षप्रमाणानन्तरबोधादौ बहुत्वमपि बलत्वमुक्तं तत्र सत्प्रतिपक्षाणां किंत्वेकत्रांशभग्नपक्षोक्तौ बहुत्वस्यानेकत्वेन एकस्य च बलाधिक्यमिति। तेको व्या
प्यतानयेतिनोपाधेः सत्प्रतिपक्षस्य दूषकतायां तद्दूषणत्वसंभवइति भावः। एवं। सत्प्रतिपक्षोन्नायकतया दूषकत्वे। बाधस्यानिश्चये असाधारण्यात्। निश्चये च वै
यर्थ्यात्। माभूत्सोपाधिरित्यभिप्रायेणाशंकते। नन्विति। हेतुमतीति। न चासंकीर्णबाधस्थलेव्यभिचारः। प्रतियोगिव्यधिकरणसाध्याभावस्यैव पक्षेन बाधत्वात्तदन
नुप्रवेशाद्धा। अतिजलत्वं विनेति। जलत्वमपीति विनाप्युद्भूतसाध्यव्यापकस्योपाधेरभावादित्यर्थः। तेन भास्वररूपशून्यत्वादेपरूपवत्वावच्छिन्नसाध्यव्यापकत्वादेस्तत्वेप्य
दोषः। न च तद्व्यतिरेकोनासाधारणः पक्षेसाध्यस्यासिद्धेस्सपक्षाभावात्सिद्धौ तु तत्रैव सपक्षेवर्तमानत्वादिति वाच्यं। पक्षमात्रव्यतिरेकसाधारणत्वस्याभिप्रायात्। जला
वावुद्भूतत्वप्रमदर्शायां तथात्वमित्यपरे। यौक्यं व्याप्तिर्जलत्वे ग्रहदशायामप्रतीतसाध्यतदभावसहचरितत्वरूपमसाधारण्यमित्यन्ये। असाधारणे हि साध्यसह
चारग्रहप्रतिबंधेनान्वयव्याप्तिग्रहप्रतिबंधः व्यतिरेकव्याप्त्यादेस्तु साध्यतदभावयोर्द्वयोरपि तद्विरोधात्। सत्प्रतिपक्षोद्दूषकताबीजं। नचेहायं। व्यतिरेकित्वात्।
द्वितीयः। सत्प्रतिपक्षेन दत्तावकाशात्। अतः पक्षेतरेति सत्प्रतिपक्षोन्नायकतयोपाधिरेवेत्याह व्यतिरेकेणासाधारणादिना नन्वेवं पक्षेतरस्योपाधेर्व्यभिचारांशोन्नायक

राम

त्वस्य सत्प्रतिपक्षे सत्प्रतिपक्षानुद्भावनीयतया सत्प्रतिपक्षोन्नायकत्वस्य दूषकतायामबीजत्वेनातउपाधिदूषणमपि न स्यात् बीजाभावात् इति अत आह तस्मादि
ति तदुक्तमुपाधेर्व्यभिचारशंकेवेति भवतु वा पक्षेतरेनोपाधिरूपादीयतां चेत्तथापि व्यतिरेकेविपक्षत्वादावृत्तेः केसादिविशेषणतां तथापि लक्षणमतिव्यापकमेव अण
बीजं त्वाणवीयत्वस्त कर्तृकः कार्यत्वादित्यादावनणुत्वे हीनत्वं व्यभिचारस्योन्नायकतामात्रेणोपाधित्वे व्यापकव्यभिचारित्वादावतिसत्त आह तथेत्याभाते न रूपेण स्व
व्यभिचारेण स्वव्यतिरेकेणावा दूषकतायां व्यभिचारस्य सत्प्रतिपक्षस्य चोन्नायकतायामतिप्रसंजनभंजिकां शांसाध्यव्याप्यत्वस्याव्यर्थत्वात् साधनाव्यापकधर्मस्यो
पाधित्वे ध्यान्वयव्यतिरेकोन्नायकान्वयव्यतिरेकशालित्वरूपसाध्यप्रयोजकत्वं नियामकं अन्यथातिप्रसंगादित्याशंकते अथेति अभवेतोऽसतः भवतः सतः। व्य
र्थत्वादिति नन्वेवं पक्षेतरत्वेतिप्रसंगस्तथापि पक्षेतरस्साध्यवत्तावतिप्रसंगात् विषमव्याप्तस्यानुपाधित्वेयोगाभावं नियामकमाशंकते अथेति। उपसमीपवर्तिन्या
दधातिस्वीयं धर्ममित्युपाधिः। यद्धर्मबोधकशब्दसमभिव्याहारेणचोपाधिपदं प्रयुज्यते तद्धर्मसंक्रामकत्वं तद्बोधयति यथा स्फटिकलौहित्येजवाकुसुममुपाधिरित्य
त्रलौहित्यसंक्रामकत्वं प्रयुज्यते च यात्रव्याप्यत्वबोधकशब्दसमभिव्याहारेण तत्र यथात्र साधनेऽसौउपाधिरित्यतो व्याप्तिसंक्रामकत्वलाभः। यदभावइति अस्तितावदि
हहेतावुपाधिर्नेहोपाधिरितिप्रतीतिर्व्यवहारश्च तथालं व्यवच्छेदलक्षणवाक्यं तत्र यदि साधनेऽपाधिव्यभिचारात् व्यभिचारेण तद्व्याप्यत्वव्याप्यत्वे वा यदि वा तेन संबंधेन
तद्धेतुप्रवृत्तौ प्रवृत्तत्वात्तद्वत्त्वे उभयथापि न हानिः। यदभाव शब्देनापि तथैव वक्तुं शक्यत्वात् तदभावस्य व्यभिचारविरोधित्वात् तत्सत्वेऽवश्यं व्यभिचार इत्यतन्विरहाति
धर्मे चावश्यं व्यभिचारसत्वं तत्सत्वेऽवश्यं व्यभिचारविरहः। व्यभिचारविरहिणि धर्मे चावश्यं तत्सत्वमिति याई दृशाभ्युविरोधोनुविषमव्यापकाभावस्य तत्सत्वे प्रिव्या
पकएव व्यभिचारसत्वात्तन्नापि विषमव्याप्याभावस्य साध्यएव तद्विरहेप्यव्यभिचाराभावात्ताद्दृशधर्मस्य चोक्तसंबंधेनोक्तसंबंधस्य वाच्यत्वात्। तथाचमुपाधिः स

एवं चोपाधिः अत एव तदभावलक्षणमनौपाधिकत्वं व्याप्तिरिति गीयते विशेषघटकदलद्वये चैकैकस्य व्याप्तिवारकतया (?) कमात्रावान्तस्यादिसुभको पार
नमिति सर्वं सुस्थं यदि च समव्याप्ताकाशो भयव्याप्तवृत्तिधर्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्स्वरूपं वृत्तिमत्स्वरूपं बोध्यं अत्र न च व्यभिचारस्य पर्यवसिते ऽथ प्रमेय
त्वपद्व्यतिरेकि धर्मो पलक्षकं अथैतादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारित्वेन तत्तत्सम...त्वात्तव्याप्तिः । तस्मात्संगमसत्त्वेनाभावान्निरूपणोनुतत्र
स्य सहेतौ ताव व्याप्तिरेतन्मात्रहव्यभिचारेणेति यस्य यद्व्यभिचारस्य पद... व्याप्यत्वस्य वा ऽभावः साध्यव्यापके व्यभिचारविरोधिसाधनाव्यापक उपाधिरित्यपि वदन्ति यद्य
भिचारित्वाभावः साधने साध्यव्यभिचाराभावापादकः न साध्यव्यापक उपाधिरित्यपि केचित् तन्न तु यद्व्यतिरेक इति यद्व्यतिरेके अनुमितिः अनुमितिप्रयोजकं रूपं
व्याप्यान्यतमं भवत्येव यथा ऽसिद्धिव्यतिरेकसिद्धिरित्यर्थः । विरुद्धत्वादेरिति विपक्षमात्रगामित्वस्य पक्षविपक्षगामित्वलक्षणविरोधव्यभिचारयोरेकैकत्वविर
हेपि व्याप्तेरनियमादित्यर्थः । नापीति यत्र पक्षे हेतुमति च साध्यं हेतुः पक्षावृत्तिस्तत्रैकस्य पक्षावृत्तिः हेतुसमानाधिकरणापरस्यापसिद्धः साध्यवति हेत्वस
मानाधिकरणो हेतुसमानाधिकरण एवं वोपाधित्वे साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोरेकैको बोध्यः । यथा धूमः पक्षसानिध्यवत्वादिमत्त्वाहेतोः सादो
साधनावच्छिन्नसाध्यव्यापकमात्रत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वदूषकत्वरूपत्वं वा तत्त्वस्य लक्षणे अयत्वं वा भिपो संकीर्णमुपाधिः ॥ अत्रावतारत्वेति ॥ यदेतेमयो द्रव्य
त्वादिसाध्यकेषु धूमवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वादावतिव्याप्तिर्दृष्टान्ते नान्तरेण रूपेण ज्ञानस्य दूषकत्वमित्याह अन्यदूषकेति पक्षधर्मेति विरुद्धस्थलीयोपा
ध्यव्याप्तिरपि द्रष्टव्या ॥ साधनावच्छिन्नेति । स्वावच्छिन्नस्य यथा साधनवत्तीति विशेषणाद्वा न व्यभिचारः । नन्वशुद्धसाध्यव्यापकस्थल एवासिद्धिशंकानिरासायावच्छे
दकांशो निवेशनीयः । अत्रत्वंऽभावस्य घटकतया च नये पर्य्यवसानरूपेणोपाधिना विशेषणावगतितद्रूपावच्छिन्नव्यभिचारस्यैव याहेतुत्वमुद्दसाध्यव्यापकस्थले

राम

शुद्धसाध्यव्यापकव्यभिचारोन्नायकतावच्छेदकावच्छिन्नत्वाद्यवच्छिन्नव्यभिचारो ना हेतुरूपन्यसनीयः यायथा तद्धूमं वाजन्द्धूमी विशिष्टसाध्यव्यापकव्यभिचारितिः ।
उद्भावितयाव दोषे रेव तत्साधनीयमिति नियमाभावात् तदन्वीत व्यभिचारेण तत्साधनसंभवात् सदिग्धोपाधिसमष्टीत्वं संदिग्धोव्यभिचार इत्यरूचेरा हकिं
चेति केवलेति तथा च केवलस्येव साध्यस्य व्यभिचारो व्यतिरेकी वा निश्चितः विरोधित्वात् ननु विशिष्टस्य विरोधित्वादिति भावः । उद्भाव्यः । विशेषणाव्यभि
चारत्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयः । न च विशिष्टसाध्यव्यभिचारे अविशिष्टो उद्भावितायां न सिद्धये उपाधिरूद्भाव्य इति यद्धत्वानुमितिमान विरो
धिशुद्धसाध्यव्यभिचारसाधकत्वादिति भावः । अथ वस्तुमात्रा ऽसावच्छिन्नसाध्यव्यापकेनाप्युपाधिना हस्ये वसाध्यव्यभिचारः साधनीय इत्यरूचेराह । किं चेति
। पक्षधर्मावच्छिन्नसादिकमुपाधिमात्रव्यभिचारोपलक्षकं । न धाधान्येनोपाधिः व्याप्यादिविरहे साध्याहेतुतान् / पर्यवसितेति अत्रैरव्यतानिपामकं दूषकतावीजं स
त्वाति पक्षोन्नायकत्वं न तु व्यभिचारोन्नायकत्वव्यभिचारोन्नायकत्वस्य तत्वे साध्यवत्पक्षावृत्तेर्व्यभिचारोन्नायके व्याप्तिः । वक्ष्यमाणाहतकत्वोपाधेर्दूषकत्वोपपत्तेः न हि तद्व्यभि
चारेणाहेतोशुद्धसाध्यव्यभिचारः शक्यो न यत्न । बाधानवतारदशायां तादृशव्यभिचारापसिद्धेः । न च पर्यवसितसाध्यव्यभिचारः साध्यव्याप्यताबोधविरोधीति न चेवमपि कथं
तत्र सद्धेतोरुपाधिसंभवे मीमांसकमतेन तदभिधानात् शब्दशब्दयोर्भावप्रधानत्वाद्धापक्षतावच्छेदकादेरुपाधिताबारणाय पक्षावृत्तित्वे सतीति पूरणीयं यदि चेति एतच्च
विनित्रकृतकत्वसाधने तदा पायो बोध्यं अनित्यत्वसाधनोपयोगि तथा कृतकत्वसाधने द्वयोरपि संदिग्धत्वेनैकतरव्यतिरेकस्यान्यतरव्यतिरेकासाधकत्वात् एवं द्वीति स्या
दित्यसमवेतत्वेन द्रव्यासमवेतत्वेन वा यां तरवारणाय सावयवत्वेऽनित्यसाध्ये द्रव्यपदं नित्यद्रव्यवृत्ति मायाः स्फुटतरसिद्धार्थं द्रव्यसमवेते ऽनित्यद्रव्यासमवेतत्वस्यानि
त्यद्रव्यसमवेतत्वमादायैव पर्यवसानात् हेतौ च नत्यपदं परमाणौ नित्यत्वासिद्धिदशायामाकाशारोप्यासिद्धहायेविशिष्टाभावस्यातिरिक्तत्वान्नैव पर्यवसितत्वमहत्त्वव्यावृत्ता ऽ

नित्ययावन्महत्त्ववृत्तिजातिविशेषपरिच्चयायतादिति तु न तादृशजातौ मानाभावात् वैभूतापेक्ष्यापकर्षव्यवहारस्यान्यथानुपपत्तौ जातिभिरेव सम्भवात् तुल्यन्यायेन
पात्रसरेणुमहत्त्वापेक्षया कश्चेत्काजातसंकरप्रसंगाच्च नित्यत्वेति साध्योपाध्योर्व्याप्तिरिति दृश्यद्रव्यत्वं नायद्रव्यपदं प्रमेयकानात्तु तेन विनापि पर्यवसितसाध्यसमव्याप्तत्व
वोपाधिरिति मतेनैव द्रमिति कश्चित् तन्न भवतामपि उद्भूतसाध्यव्यापकं स्पर्शवत्समवेतत्वं कथं नोपाधिरनवस्थाभिपाकस्य चित्रित्वपवस्य स्पर्शवतः सिद्धौ तत्समवेत
द्रव्ये साध्याव्यापकत्वादिति चेत्तुल्यमेतत्मापीत्यलमत्र आह किंचेति सोपाधौ सोपाधित्वपाभिव्यक्तेन तुल्यप्रत्वं लाभयोग्यतापक्षेपादृशः साध्यं सहेतुमत्त्वतिन व्यापकत्वे सति
पक्षावृत्तित्वं पक्षे साध्यसिद्धिविरोधिव्यापकताशालित्वमिति पावतत्त्वव्यतिरेकेण पक्षे साध्यसिद्धिविरोधिव्यापकत्वमिति तु पर्यवसितार्थः भवति च श
व्यधर्मातिरिक्तधर्मरहिते शब्दे नित्यत्वाभावसिद्धिर्यथोक्तसाध्याभावसिद्धिविरोधिनी तथा साधनादिमति साधनावच्छिन्नसाध्याभावसिद्धिविधि वस्तुतस्तु पक्ष
धर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वमिति च विशेषणावृत्तिविशिष्टसाध्यव्यापकव्यतिरेकेण उद्भूतसाध्यव्यतिरेकः। तादृश
स्य साधनव्यापकः संग्राह्यो व्यभिचारोन्नायकत्वं च पक्षवृत्तिरिति तेषामपरेषां सत्त्वात् पक्षोन्नायकस्य समस्य साधनव्यापकस्येवाव्याप्यकमपि व्यभिचारोन्ना
यकस्य पक्षवृत्तेः संग्रहो न दोषाय परेषां साधनमेदादिवान्मा कमपि पक्षभेदादुपाधिभेद इति चेत् अत्र ग्रन्थकृतैव वक्ष्यते लक्ष्यतावच्छेदकमाह पक्ष
।भिचारित्वेनेत्यादि उन्नीयत इति शेषः। उन्नायकत्वं च नयनयोग्यता सा च व्याप्तिपक्षधर्मते तित्तथा च पक्षव्यभिचारिपदं धर्मावच्छिन्नाभावाधिकरणीभूतप
।किंचिद्धर्मावच्छिन्नं साध्यव्यभिचारव्याप्यसाधनवृत्ति च तद्धर्मावच्छिन्नं तत्रोपाधिरित्यर्थः। तेनार्द्रेन्धनाभावव्द्वृत्तित्वेन वह्नौ धूमव्यभिचारसाधने
नार्द्रेन्धने द्रव्यत्वादिना न तत्रोपाधिः। तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वह्न्यवृत्तित्वात् उद्भूतसाध्यव्यापकेन तदभाववत्त्वमात्रवृत्तित्वं साध्यव्यभिचारव्याप्यत्वावच्छि

राम

न्नसाध्यव्यापकेत्यवच्छेदकाधिकरणीभूततदभावाधिकरणवृत्तित्वमित्युभयत्रापि संगतिः। द्रव्यत्वेन रूपवत्त्वे साध्ये सत्त्वाद्द्रव्यत्वजलत्वमात्रविशेषाधि
कायाधीः तद्विशेष्यत्वे जलसमवेतनित्यत्वेन वायुरित्यादि पृथिवीत्ववद्वृत्तित्वादित्यादिप्रकारेण व्यभिचारोन्नयनसमर्थोऽपि पृथिवीत्वाभाववान्नोपाधिः।
न हि पृथिवीत्वात्मकतदभावाधिकरणं तादृशं किंचिदस्ति यद्वृत्तित्वक्षमान्यं साध्यव्यभिचारव्याप्यपृथिवीत्वादावेव व्यभिचाराभावात् न च व्यभिचारोन्नायक
तामात्रेण पक्षेतोपाधितानिर्वाहः अपि तु कथकानां तान्त्रिकाणां च तथाविधव्यवहारविषयत्वेन तदवच्छेदकं च यथोक्तरूपं व्याप्यत्वात्। सैवुन्नायकतादिकं
संभवदपि न तथा गौरवात् अत एवेदं जलमाकाशादिस्पत्रत्व्याप्यत्वेन जलत्वाव्याप्यत्वे नायकत्वापि द्रव्यत्वादेः संग्रहो न दोषाय अथैवं व्यभिचारे
ण व्यभिचारोन्नायकत्वमेव तत्पादनलाघवात् न तत्रोक्तोपाधावलीति चेत् एवं तर्हि साध्याभाववत्साधनोभयाधिकरणवृत्ति[illegible]त्वाभावव्याप्तिपोषितमेव तत्पादनानुगति
लाघवात् अस्तु च सहायीति तौ पापप्रपतेनापातिसस एवार्थः तद्रूपमात्रज्ञाने तेषां नोपाधिव्यवहार इति चेत् व्यभिदं त्वदुक्तोपि अत एव शुद्धसाध्याव्यापकस्ये
त्वे साध्ये व्याप्यतावच्छेदकं नियमन तत्तादृशं धर्ममन्तरं सर्वं तेन यद्वृत्तिसाध्यव्यभिचारनियमो भवत्युपाधि व्यभिचारस्य वस्तुतस्तु पदभावेन यद्वदन्यत्वेन वा
साधनवति साध्याभाव उन्नीयते स उपाधिः लाघवात् अतएव जलत्वतेजस्त्वयोर्न तदुभयत्वेन कश्चिदप्युपाधित्वं यद्व्यभिचारित्वेनेत्यस्याप्ययमेवार्थः। तथा
हि पद्व्यभिचारित्वेन हेतुमद्वृत्तित्वविधया साधनस्य पक्षतावच्छेदकीभूतस्य साध्याभावरूपसाध्यवत्पक्षवृत्तित्वासिध्यतीति अत्र च साध्यसमानाधिकरणत्वे
नावच्छिन्नो धर्मः साध्यसमानाधिकरणार्द्रेन्धनादिव्यक्तेरार्द्रेन्धनत्वादिनोपाधित्वेऽपि न तदवच्छेदकधर्मस्य साध्यसमानाधिकरणवृत्तित्वेन विशेषणीयः। तेन जलह्र
दत्वाभावाधिकरणयोगोलकवृत्तित्वस्य धूमव्यभिचारव्याप्यस्य वह्निवृत्तित्वेऽपि जलह्रदत्वे नातिप्रसंगः। न वा द्रव्यत्वेन तेजस्त्वसाधनेऽपि नीतस्पर्शजलत्वाद्यात्मकत्वाभावे

नतद्वृत्तित्वेन वा तद्व्यत्वेन वा साध्याभावस्य व्यभिचारस्य वा साधके स्वर्गाभावजत्वाभावादौ द्रव्यत्वादिनाकं बुद्ध्यादिमत्त्वादौ साध्ये व्यभिचारेण तदभावेन वा हे-
तोर्न तद्वृत्तितया व्यभिचारस्य साध्याभावस्य वा साधकं घटत्वादिव्यभिचारित्वेनोपाधिरेव घटत्वादेस्तदभावस्य वा गमकत्वेऽपि धूमस्य गमाभावे च वैयर्थ्येन चाभावस्या-
नुपाधितापत्तिः प्रतियोगिनस्तद्वृत्तित्वस्यैव वा हेतुत्वादिति वाच्यं तस्याप्रवेशेऽपि वस्तुतो यत्तदभावस्य तद्वृत्तित्वं चेद्धेतुत्वानपायात् तदभावाभाववद्-
वृत्तित्वेनोपाधितावृषित तद्वृत्तित्वेनानुपस्थिते व्यभिचारसाधनेन वैयर्थ्यमित्यपि वदन्ति। लक्षणमाह। पर्यवसितेत्यादि। पर्यवसितपदार्थमाह यद्धर्मेति। यद्-
र्मवतीत्यर्थः। नन्वेवं यद्धेतोः पक्षैकदेशवृत्तिधर्मे गतिः प्रसंगः। अथ यद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वं साध्यसाधनमत्त्वं
धव्यापकत्वमिति यावत्। विरुद्धमात्रे चोपाधिविरहेऽपि न क्षतिः। तत्स्यूनतावच्छेदके च साध्यसमानाधिकरणत्वेन साधने तादृशवृत्तित्वेन वा साधनतावच्छेदकं वि-
शेषणीयं साधनव्यापकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वं वा विवक्षितं। विरुद्धमात्रे च साधनव्यापकेनांततोऽन्यतरत्वादिनावच्छिन्नस्य साध्यस्याव्यापकत्वमस्त्ये-
वोपाधीनां प्रमेयत्वादिना च बाधादौ प्रसक्तत्वे साध्ये उद्भूतरूपवत्त्वादिकं नोपाधिः। तत्स्यूनतावच्छेदकं वा कार्यप्रयोजकत्वं वा चिन्तनीयावत्वात् पक्षधर्मिव्यभिचारस्य चेत्सा-
धनस्य साध्यव्यभिचारो नियमतः सर्वं पर्यवसानानामेवं जनकत्वेन वह्न्योकार्यानुकूलत्वे साध्यात्मकत्वात्। किं साधने वह्निरिन्द्रियप्रसक्तत्वस्य उपाधेः प्रसक्तेनोद्भा-
वयितुमशक्यत्वात्तस्य च गुरुत्वात्मकसाध्यस्य साधनस्याधिकरणेऽनुदाहरणे वृत्तेरुक्तरूपाभावादेवं प्रकृतलक्षणं यावितेधातूद्वयकनावीजस्य तत्रापि संभवा-
त्। अत आह। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वं अवच्छेदकत्वं सामानाधिकरण्येन न चैतद्दोषस्त्रिकालीनत्वसामानाधिकरण्यवि-
शिष्टरूपवत्तितद्वैरवर्जमानमपि तद्वृत्तान्यतरत्वं तद्व्यापकं येन पृथिवीत्वेन रूपे साध्ये तद्दोषलक्षिकालावच्छिन्नरूपव्यापकत्वमुपाधिः स्यात् त्वानधिकरणीभूतसा-

धनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा। यद्यपि तु यत्साध्यव्यापकस्य तेऽवच्छिन्नसाध्यत्वेन न व्याप्यकत्ता तथापि तद्धर्माधिकरणीभूतसाध्या-
धिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वादिरूपं तद्व्यापकत्वमक्षतमेव गगनत्वादिना प्रसक्तत्वेऽसाध्ये उद्भूतरूपवत्त्वं अप्रगुणकजन्यत्वावच्छिन्नसाध्य-
व्यापकं न भवत्येवोपाधिः। एवं च पर्यवसानाधिकरणे साधनस्य साध्यव्यभिचारे यत्र च साधिकरणे साध्यं तद्धर्मेण न वृत्तिर्यो धर्मस्तद्वत्तित्वव्यभिचारेण
सा साधने साध्यव्यभिचारः। साधनवति वा तद्धर्मवत्त्वे सति तदभावत्वेन साध्याभावः साधनीयः। साध्यसमानाधिकरणस्य साध्यव्यापकाभावस्य वाऽधिकरणं यत्सा-
धनाधिकरणं तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताधिकरणत्वं तदभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वमुपाधि-
त्वं एवं च पर्यवसितसाध्यव्यापकत्वाभिधाने व्यापकाभावेनाव्याप्यभावप्रदर्शनार्थं न तु साध्यकत्वसाधनकसकलोपाधिसाधारणं चेदं। साध्यव्याप-
कत्वसाधनाव्यापकत्वावच्छेदकरूपानतिरिक्तवृत्तिसाध्यसमानाधिकरणयत्किंचिद्धर्मव्यापकतावच्छेदकरूपवत्त्वमुपाधित्वं वा अवच्छिन्नसाध्यव्यापकोपाधौ चां-
ततः साध्योपाधिश्रमसाधनवतीयाव्यक्तिस्तदवृत्तित्वमेव तादृशं रूपमित्यपि वदन्ति। रूपादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापत्तेस्तुच्छ-
विशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं। अत्र च पूर्वदलप्रविष्टपासाधनव्यापकत्वाद्व्याप-
कत्ववोध्यं तेन रूपादिना गुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसंगः। विवेचयिष्यति चेदमुपरिष्टात्। साध्यासमानाधिकरणधर्मस्य साध्यव्यापका-
भावस्य वा समानाधिकरणं यत्साधनं तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताधिकरणत्वं साभावप्रतियोगितावच्छेदकसाध्यसमानाधिक-
रणवृत्तिधर्मवत्त्वं वा एवं चावगते साधनवति साधने वा साध्यासमानाधिकरणधर्मादिना तत्सामानाधिकरण्येन वा साध्याभावो व्यभिचारो वा शक्य-

नेयानुमितिध्येयं। उपाधिश्च द्विरूपः साधननिष्ठसाध्यव्यभिचाराद्यविषयत्वसहितमनुमायां तु साध्यव्यभिचारित्वेन साध्यव्याप्यत्वेन वा साधनं निवेशनी
यं॥ मिश्रास्तु। यद्व्यभिचारित्वेनेत्याद्येवलक्षणमूलपर्यवसितत्वादिकं तु व्यभिचारोन्नायकताप्रयोजकरूपप्रदर्शनं न तु पूर्वं पर्यवसितं व्याप्तेः द्वितीयं च पक्षधर्मता
याः प्रदर्शनार्थं एवं चायमितरसाधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगीत्युपर्यकेऽयमन्त्रहेतावुपाधिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्वमित्या
कांक्षायां व्यभिचारोन्नयनमपि साधुसंगच्छत इत्याहुः। न व्याप्त्युसंयोगवदन्यत्वे न द्रव्यत्वाभावस्यैव संयोगाभावस्याभावेन संयोगेन द्रव्यत्वाभावाभावस्य द्रव्यत्वस्य
साधनसमव्याप्तदेकदेशस्तु ध्रुवकरूपवत्त्वं प्रतियोगित्वं च न द्रव्यत्वं तु सादिनं च प्रतियोगिताव्छेदकस्यान्याभावाभावत्वं शेषं पूर्ववदिति वदंति। विशेषणा
व्यभिचारित्वेन सत्ता। सामान्यतो दृष्टमेकविशेषणाधेमावयतिविशेषणांतरप्रकारिकामनुमितिं न चातिरिच्यते विशिष्टाभावो विशेषणाविशेष्याभावाभ्यामि
ति मतेनेदं लक्षणमतेनाह यद्वेति प्रत्यक्षस्पर्शाश्रयत्वमित्यादि। प्रत्यक्षस्पर्शपरिमाणवत्त्वाद्युपाध्यभिप्रायेण यथाश्रुतमेव साधुत्वमित्येकत्वादेरपि प्रत्यक्षत्वानी
कारादद्रूपवत्त्वादिप्रत्वे साध्ये हेतोश्च प्रत्यक्षस्पर्शवहिर्द्रिप्रत्यक्षस्पर्शं द्रव्यपदेवावहिर्द्रव्यपरे महत्त्वपदं च जन्यमहत्त्वपरमिति। व्यापकव्यभिचारित्वं च
व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वं। न च द्रव्यपदवैयर्थ्यं विशिष्टाभावस्यातिरिक्तत्वानाद्द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरूपव्यभिचार एव हेतुः।
व्यापकत्वोपन्याससत्तर्कप्रदर्शनायेति गुणत्वद्रव्यत्वाव्यभिचारो द्रव्यत्वाभाववद्वृत्तित्वमित्यातत्वयेत्वमिति अनुमाननिदर्शनापाधेः प्रमाणोनरेणसाधना व्या
पकतानिर्णयप्रदर्शनाय नमनुगतद्व्यभिचारित्वं नदत्वं नाभाववद्वृत्तित्वं न पाचसाधनविकल्पोपसाध्यवान्दृष्टान्तइत्यतआह अव्यभिचारश्चेति निन्येवं शेषवे
यर्थ्यं धूमप्रागभाववद्वृत्तिमेदादवैयर्थ्यमिति चेन्न तथापि निश्चातनयत्वव्यापकत्वविशेषितं द्रव्यत्वमेवगमकमिति चेन्न यत्किंचित्रदर्शिकरणनिष्ठासंताभावाप

।राम०

निप्रतियोगित्वस्य फलतः सामानाधिकरण्यपर्यवसितत्वोक्तत्वात् तथा चायमर्थः। मित्रातनयत्वाधिकरणधूमक्तिनिष्ठासंताभावप्रतियोगित्वं तत्र शाकपाक
जत्वव्यभिचारात् मित्रातनयेशाकपाकजत्वव्यभिचारत्वादिति यावत् तेन श्यामत्वादेव व्यभिचारः। अव्यभिचारित्वेत्साध्यव्यभिचारी निसामान्यव्याप्ते
रापटत्वं इत्यतआहुः भेदपत्वाद्यपि विशेषणावति विशिष्टसाध्यव्यापको यो विव्यभिचारेणशुद्धसाध्यव्यभिचारः साधनीयः। एवं विशिष्टसाध्यव्या
पकस्यापि साक्षाच्छुद्धसाध्यव्यभिचारोन्नायकतयोपाधित्वसमर्थ्यसाक्षात्स्वरूपसाधारणेन तदुन्नायकतमाश्रेणतथात्वव्यवस्थापयतियद्वेति। अत्र पूर्वव
द्विरूपद्वारणयत्साध्यसमानाधिकरणेपेतिवोध्यं व्यभिचारोन्नायकत्वं च यत्र कुत्रचित् एवं च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नाय
कस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारीति वृद्धाः प्राहुः। न चैवमपि गुरुत्वादिसाध्यकरसवत्त्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभिचारिजलभिन्नेपृथिवीत्वादिव्यभि
चारादिति व्यभिचारोन्नायकपृथिवीत्वारावतिप्रसंगः। साधननिष्ठव्यभिचारित्वं साध्यव्यभिचारोन्नायकं तत्त्वस्योक्तत्वात् हंत कि चैवं च अत्र पूर्वस्माद्वैरूप्यं के चित्तु व्य
भिचारोन्नायकत्वमिह तद्व्याप्यकोटिप्रविष्टताभावेन। इदं च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारित्वे हि व्यापकत्वात् घटेन वा घटत्वे साध्ये घटोपरत्व
व्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्यत्वे हि हस्तद्रव्यत्वस्य च वारणाय साधनव्यभिचारीति। अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादिवृत्तित्वादि
ति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणोऽपि वक्तव्यः। एवं च रूपेणाद्गुरुत्वादौ साध्ये रूपं गुरुत्वादिव्यभिचारि जलभिन्ने पृथिवीत्वाभाववद्वृत्ति
त्वादिति। व्यभिचारोन्नायकस्य गुरुत्वादिव्यभिचारितेनसहरूपनिष्ठव्यभिचारप्रतियोगिनः पृथिवीत्वाभाववारणाय न्यायिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्ना
यकत्वं वक्तव्यं। यथा कथंचित्तद्व्यभिचारेण व्यभिचारोन्नायकमात्रस्य तत्स्थले यत्साधनव्यापकव्यापकत्वं तद्धर्मो व्यभिचारोन्नायकत्वं गोचमित्याहुः। अन्ये तु पादिभावि

कमुपाधित्वं तथा च साक्षाद्व्यभिचारोन्नायकतया दोषाभावेन तदुद्भावने ऽर्थान्तरं स्यादेवेत्यत आह किं चेति। (आ)भासान्तरस्य तदानीं ज्ञापनात् एव तथा च तस्यावधा-
प्युपेयदोषभावत्वेन तदुद्भावने नार्थान्तरमिति भावः। अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्यैव साधनोपन्यासानन्तरं तद्दोषव्यभिचारादेरेवाकांक्षितत्वात् तन्मदुद्भा-
व्यं तत्साधकस्य दूषणस्य व्यापकस्योपाधेरुद्भावने ऽवसरप्राप्तत्वात् केवलं कथापरंपरया तत्साधकस्य वृद्धिस्तस्य व्यापकस्य अन्यथा तत्साधकपरंपरा-
या अपि प्रष्टव्यमनुपन्यासेन तथात्वं न स्यात्। न च निग्रहस्थानत्वेन विशेषः प्रतिज्ञाहान्यादितो हेत्वाभासानां बहिर्भूतस्य तथात्वायोगात् न च विभाजकसूत्रस्यैव हेत्वा-
भासाश्चेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परंपरया वानुमितिदोषानायकस्य संग्रहः। तथा सति व्यभिचारस्येवाश्रयासिद्ध्यादेरप्युन्नायकस्य तदुभयोन्नाय-
कपरंपरायाश्च तथात्वापातात्। न चाप्रामाण्यकालात्ययापदिष्टविशेषस्य मनुपस्थापकोऽसौ कथकसंप्रदायात् उद्भावयितव्यः। सम्प्रदायमनादृत्या-
नुमानदूषकत्वं परामृशतः। आपततिनिराकरणाय तेः। नन्वात्माश्रयसंभूतसाध्यव्यभिचार एवोद्भाव्यतां तत्कथं तत्राप्यन्यद्गतत्वेन साध्यव्यापकोपाधिव्यभिचारः
विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्योपाधेर्विशिष्टसाध्यव्यभिचारः। अत्र च विशेष्ये कथं तावद् विशिष्टसाध्यव्यापकउपाधिव्यभिचार इति।
वस्यात्तेन च व्यभिचारादेरुद्भाव्यत्वादेरपि ज्ञानव्याप्याद्धिपत्वनिर्वाहकं तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचारवानयमिति उद्भावनीयमिति। साध्यव्या-
पकत्वाभिप्रायात्। उपाधित्वोपपादकतदभिप्रायात्। अनुकूलतर्कादिनातादृशव्यापकत्वनिश्चये वा धोजीनवद्भूतत्वेन निश्चितोपाधिः। न च तत्त्वव्याघातकत्वा-
न्नापकमुपाधितादृशेन सर्वानुमानसाधारण्यं अनुकूलतर्कादिनानिश्चितव्याप्तिकेहेतौ तदभावात् नापि तद्व्यभिचारित्वाव्यभिचारानुमाने विपक्षेतरत्वस्य उपाधि-
त्वसंभवात् अनुकूलतर्कादिना तस्य साध्यव्यापकत्वानिश्चयेऽव्यापकव्यभिचारित्वाद्व्यभिचारादर्शनेन तद्योगात्। अत एव पक्षेतरत्वस्योपाधित्वेऽसर्व-

१८

त्रैव तादृशोपाधिसंभवेनानुमानविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्य व्याघात इति परास्तं। कथकसंप्रदायात्तदोषाद्भावानुन्नीतः पक्षेतरो नोपाधि-
रिति न कथाया मुद्भाव्यत इति वदन्ति। पक्षमात्रेति। यद्यपि पर्वतावयवस्यापि व्यावर्तकं तत्तथापि तत्त्वव्यावृत्तिर्नोपाधितायामुपयुज्यते अपि तु पक्षस्यैवेति तन्मा-
त्रव्यावर्तकत्वमुक्तं। इदं चानुपाधितायां न बीजं परिमाणमात्रत्वात् किं तु अनुकूलतर्काभावेनातादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यं अत एव व्यापकताग्राहकानु-
प्रमाणमुद्भावादेव अथान्यस्य तत्रान्वयव्यतिरेकाभ्यां आर्द्रेन्धनत्वादिनेकारणत्वं नेत्रं तदार्द्रेन्धनप्रभववह्नित्वेनेति चेन्न किं चातः न हि कारणतावच्छेदकमेव व्यापकतावच्छे-
दकं तादृशाप्रतियोगितानवच्छेदकस्यैव तत्त्वात् तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्ध्वनितत्वेन साध्यव्यभिचारसाधनेऽपर्यवसानात्। सत्यपि चा-
र्द्रेन्धने तत्संयुक्ते च वह्नौ दाहप्रतिबंधकसत्त्वे धूमानुत्पादात् तत्समवधानकारणाभावस्यावच्छेदकविशेषणरूपेण कारणत्वकल्पने नैवोपपत्तावत् अतस्तत्कारणाभावानां
दाहप्रतिबंधकाभावानां तत्कारणत्वकल्पनानौचित्यात् एकस्यामार्द्रेन्धनव्यक्तौ प्रतिहद्धायां तत्रैव व्यक्त्यंतरे धूमोत्पादात् तत्तदार्द्रेन्धनजन्यधूमं प्रति तत्तदभावानां
कारणत्वस्यावश्यकत्वेऽतिगौरवाच्च महति चार्द्रेन्धने तत्सम्भवे चाणीयसि वह्नौ महति च विद्यमानेऽपि आर्द्रेन्धनप्रभवमहावह्नेरनुत्पादवत्तायां प्रकृष्टधूमानुत्पा-
दादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदंति तद्दूषयति। आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पाद-
नियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वं आर्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमर्थवशात्संपन्नं नतु पक्षमेव वास्तु फलतो न कश्चिद्विशेष इति भावः। अन-
न्यथेति तादृशान्वयव्यतिरेकाभ्यां प्रकृतानुरूपस्य तद्धूमस्यैव कारणत्वे उभयथापि व्यापकत्वमुभयत्र रूपत्वेन तत्त्वं प्रकृतरूपवत्तामेव घटेऽप्यज्ञानेन ध्वंसप्रागभा-
वानधिकरणस्य प्रतियोग्यधिकरणत्वनियमात्। न च प्रागभावस्य प्रतियोगिध्वंसद्वयवत्त्वं प्रतियोगितेनोच्छेद्यत्वनियतिवाच्यं। अथोत्तिकध्वंसमतत्वकारणाधारक

त्मना तो ध्वंसानन्तत्वकल्पनापाएवाचितत्वादिति भावः कार्यकारणयोरेककार्यकारणभावग्राहकप्रमाणाक्रोडीकृतयोरेव। पक्षेतर स्येत्यादिनतु
संदिग्धोपाध्यंतरवत्पक्षेतरोपि व्यभिचारशंकाधायकः केनु बाधितः। स्वव्याघातकत्वं च निरुक्तमेव। अथान्त्र कश्चिदुपाधिर्भविष्यतीत्याशंकायां
कापि शाचीनाप्रथानव्यभिचारशंकाधायिका तथा पक्षेतरस्योपाधित्वशंकापि तदा हि तापि वा व्यभिचारशंकापक्षे व्यभिचारशंकेव न प्रतिबंधिका अन्यथा
निरूपाधिसहचारभंगप्रसंगमात्रेण लप्तज्ञानानुमानानाविलयप्रसंगादिति चेन्न। संदिग्धोपाध्यंतरसाधारण्यव्यभिचारशंकाधानप्रयोजकरूपवत्वात्प
क्षेतरेणान्तराधाने प्रयोजनसत्वेः प्रतिबंधकत्वासंभवात् व्यभिचारज्ञानत्वेन प्रतिबंधकतायां कारणविशेषणजन्यत्वाजन्यत्वादिकं न निविशते। गौरवान्नानाभा
वाच्च। कथमन्यथा करवृहिसंयोगः सर्वसंयोगावाप्रसक्तसंयोगधर्मानिरिक्तधर्मसमवायीस्यवाप्ति त्वादित्यत्रातिप्रसंगादिति हि। निरूपाधित्वेप्यप्रयोजकत्वा
दिति चेन्न। निरूपाधित्वस्यैवाप्रयोजकत्वात्। तथात्वपि वाप्रयोजकत्वे निरूपाधित्वाभिमतानामितरेषामपि तथात्वात्। अत्र च कुत्र चिदुपात्तातिरिक्ते व्यभिचारशंकाके
श्चापि आमो होमध्यासिधाहकरतनरभमाणाविरहिणा पाधित्वमिति यतत्वमनुरुणान्ततः पक्षसपक्षैकदेशावृत्तिधर्मावच्छिन्नसाध्यव्यापकानां पक्षैकदेशावृत्ति
धर्माणामुपाधित्वं संभवति। इत्थं च पक्षनातिप्रसंगन्यायात् नवकाशः इति चेन्न सत्यं कथं केसंप्रदायानुरोधात्कथायां संदिग्धोपाधित्वेन पक्षेतरोन्नो द्भाव्य इत्येवं प
तो यं ग्रंथ इत्याहुः। सोपाधावेकत्रैतादि। उपलक्षणमेतत्। व्यभिचारित्वपुपाधेरवश्यंभावमात्रे च तात्पर्यं उपजीव्योपजीवकभावो हि न कार्यकारणभावोऽसंभ
वात्। व्याप्यव्यापकभाववत्त्वं किंचित्करएव विशेषणत्वज्ञापनानदूषकतायामेकमविज्ञातया उपजीव्यत्वज्ञानाज्ञानजन्यत्वाज्ञापकभावः। न चानुकूलतर्कविरहा
देवव्याप्तेरप्रहेस्तत्तमपाधिज्ञानेनविनाप्यनुकूलतर्कं व्यभिचारग्रहेव्याप्तिग्रहसंभवादिति भावः। पक्षाद्रस्येति। अत्र पक्षस्यतिरूषणस्य निरुष्टसाध्यव्यापकस्य

न्नापकव्यावृत्तिप्रतियोगित्वमर्थः। एतेनाति पक्षो न्नापकत्वं चानुदूषकताबीजं। तत्र चाप्रयोजकत्वात्साधनाव्यापकत्वं नोपात्तं। साधनस्योपाधि
त्वमुक्तसारूप्येवं केवलं पक्षसाधनस्येति। यद्वा साधनस्येत्यनंतरमेककारणाइति। कारणत्साधनवच्छिन्नसाध्यस्य न्नापकव्यावृत्तिप्रतियोगित्वमर्थः
। तथा च पक्षाभिचारित्वेनेत्यादिरूपवतिगिरार्थः निष्कर्षः। एवाप्रयुक्तस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधीनां पक्षैकदेशे साधनवति वा साध्याभा
वपक्षैकमुन्नयनप्रकारमाह। स चेत्यादि। साधनवत्वेनज्ञायमानेपक्षे साध्यसाधनसंबंधाभावः सिध्यन्नप्यधर्मितावच्छेदकसाध्याभावमादायपर्यवस्यति। नन्विह
साध्याभावो न्नापकस्योर्द्धनवत्वादेः कथं साध्यसाधनसंबंधाभावो न्नापकत्वमनाश्याहृत्याद्वेधनेति। अत एवेति। साध्याभावसत्वे साध्यसाधनसंबंधाभावस्यावश्य
कत्वात्तदुन्नापकत्वमसत्तमितिभावः। द्रव्यत्वइति। द्रव्यत्वस्य हेतुत्वाभिप्रायेण। अयं च प्रकारः संभवतीत्यभिहितः। वस्तुतः प्रकारभेदेपि न क्षतिः। तथा च शुद्ध
साध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्नसाध्यव्यापकस्थले तवच्छेदकवृत्ति अवच्छिन्नसाध्याभावोऽवच्छेदकविशेषितेनवोपाधिविरहेण शुद्धसा
ध्याभावः साधनीयः। अत एव गगनादौ स्पर्शवत्वेन प्रमेयत्वे न चाभ्रत्वस्य साध्ये वह्निर्धूमत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतु
त्वमिति। पक्षेपक्षावृत्तावपक्षसाधनस्य संबंधिपक्षसाधनविशिष्टे साध्ये निवर्तमानस्य यथाश्रुतग्रंथस्वरससिद्धः। नन्वेदूषकताबीजं प्रदर्शयन्ति पक्षो न्ना
पकत्वं तदा साधनानुप्रवेशो व्यर्थः। जलं द्रव्यं गंधवत्वादित्यादौ पृथिवीत्वादावतिव्याप्तिः। अथ व्याप्तिग्रहो न्नापकत्वं तदा साध्यानुप्रवेशो निरर्थकः। जलं गंधवत् द्रव्य
त्वादित्यादौ पृथिवीत्वादावतिप्रसंगः। अथ यथासंभवमभिहितः। अतः व्यतिप्रसक्तस्य चोन्नापकत्वं तदा वापुः स्नेहवान् गंधवत्वादित्यादौ जलत्वपृथिवीत्वादावव्याप्तिः। सा
धानविशिष्टसाध्याप्रसिद्धेः। साध्यवत्साधनवत्पक्षकारकं वाधविरोधितुप्रिकाभावो न्नापकत्वमर्थः। विरुद्धाद्विचेत्काभावत्वादिरूपरूपवत्त्वाभिन्नविरुद्धस्थले

गुणत्वमादिरूपतयाविशेषबोधकत्वेऽसिद्धाःसमन्वयइत्यपिवदन्ति।यत्तुसाध्यापादकत्वेसतिसाधनाव्यापकत्वेनशून्यत्वेनसाध्यसाधनेऽनुगमय्यन्तदभावात्रा
पकत्वंवाच्यमितितन्न।पक्षाभिन्नाभिन्नसंबंधेनसाध्यसाधनभावस्तत्रसद्धेतुकेहेतुनातत्संपादकेनसंबंधेनसाध्यस्यसाध्यतासंपादकेनचहेतोरन्या
पिचपयाकथंचित्संबंधेनोपपत्त्याभावेनापकेतिव्याप्तेः।किंचानाद्रूपधर्मशून्यत्वेनरूपान्तरेणवानदभावेनापकत्वमितिमतं।नाद्यः।साध्यसाध
नान्यतरत्ववतितदसंभवात्।नान्त्यः।धूमेनपर्वतेवन्हौसाध्येमहानसीयवह्नित्वावच्छिन्नाभावेनापकमहानसत्वादावतिव्याप्तेः।यत्रपक्षावृत्तित्वे
सतियेसाधनवदवृत्तिपक्षावृत्तित्वेनपक्षेसाधनवत्त्वाविशेषात्वेनकाद्भावगतीत्यत्रसाध्यव्यापकत्वमर्थमाहुः।तत्रपक्षेवृत्तित्वेस
व्यभिचारयोरन्यतरमात्रेऽपकत्वंदूषकताबीजंतदाद्रूपोऽनुगमनफलं।अथवायासंभवमुपयोऽपकत्वंनदाऽवृत्तिहेतुकेसाध्यवनिपक्षोऽनापके
ऽव्याप्तिरिति।यदपिचपक्षतावच्छेदकेसाधनेचनवर्त्ततेपक्षवृत्त्यन्यपक्षतावच्छेदकसाधनेऽवृत्तिवृत्तीतिविशेष्यस्यवाच्यत्वेसाध्यव्यावर्त्तकत्वमर्थमाहुः।त
न्नापिकिंपेनसंबंधेनहेतुतातेनअथयेनपक्षतावच्छेदकंपक्षेवर्त्ततेतेनतद्येनकेनचिन्नाद्दशायसाध्यव्यावर्त्तकत्वमभिमतंनाद्यः।जलपक्षकवह्नि
साध्यधर्मसंयोगसंबंधेनसाधनेधूमादौवह्निसामग्र्यादावव्याप्तेःपक्षतावच्छेदकस्यसंयोगेनावृत्तेःसंयोगेनधूमवतोवह्निमत्त्वानियमात्।नद्वितीयः।घ
टोजातिमान्मेयत्वादित्यादौसमवायिताद्यव्याप्तेः।वह्निमत्पर्वतपक्षकेपर्वतोवह्निमान्धूमादित्यत्रधूमावयवेवह्निव्यावर्त्तकेवह्निसामग्र्यादावतिव्या
प्तेश्च।अतएवतेनरूपेपीतादिकमूहनीयमितिकृतंपल्लवितेन।आपाद्याप्रसिद्धेः।आपाद्यस्यवह्निव्यापकत्वेसतिधूमाव्यापकत्वस्याप्रसिद्धेः।अनुमिती
ति।अस्मदुक्तंव्यभिचारोन्नायकत्वेनतदुक्तंयन्नरूपयोग्यत्वंतद्यातिपक्षधर्मताद्रूपपर्यवसितसाध्यव्यापकत्वादिकंवानुमितिप्रतिबंधकतानावच्छ

तावच्छेदकमेवेतिभावः।ननुसामान्यलक्षणमिनव्यावृत्तोपाधिकंविशेषलक्षणंतुदूषकतायामुपयुक्तमितइत्यतआह।।विशेषेति।यथाश्रुतेऽवच्छि
न्नेसाध्यव्यापकोपाध्यव्याप्यत्वंकिंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेवयत्क्व्यतेयथाचवह्निनाधूमस्यधूमेनवह्नेर्वासाधनेपक्षेतरत्वस्यतद्रूपतानाद
नुमितिप्रतिबंधापत्तेरित्यर्थः।व्यवहारोपयिकत्वेचतत्रोपाधिव्यवहारापत्तेः।पर्यवसितेत्यादेरभिधानेचास्मन्मतेपर्यवसानइतिभावः।व्यवहारोपयि
कंस्वव्यभिचारेणसाध्यव्यभिचारोन्नायकत्वंलक्षणंतत्तुतत्साध्यसमानाधिकरणत्वेसतितत्साधनाव्यापकत्वं।साध्यसाधनभेदाद्भिन्नमेवाव्यवहारोऽव्य
भिचारित्वात्साधनस्यानुपपत्तेरात्वेनातिप्रसंगः।नचरूपेणाऽद्रव्यत्वेसाध्येपृथिवीत्वाभावादेरुपाधितापत्तिःगुरुत्वव्यभिचारिरूपव्यक्तेरसाध्यत्वात्।
द्व्याप्यरूपव्यक्तेरव्याप्यत्वात्व्यभिचारादिति।दूषकतोपयिकंतुयथासंभवमनुगमनमेवेतिमतमभिसंधायेत्युपरिष्टादुत्तरत्रसाधीयः।साधनव्यक्तिस्वरूपेण
र्मेनोपाधित्वं।अपितुसाध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भंतत्तद्रूपत्वेनसकलगुणव्यक्तिगुणोपाधेरपिद्रव्यत्वस्यगुणत्वेनएकत्वगुणत्वेन
निरूपाधिताव्यक्तित्वेनगुणत्वेनसाध्यतानाविशिष्टेनसंयोगसाध्यत्वेनोपाधेरसत्तायागुणकर्मान्यत्वविशिष्टसत्तात्वेननिरूपाधिताः।तथाचतद्रूपावच्छिन्नेसाध्येतद्रूपा
वच्छिन्नेसाधनेचकउपाधिरित्यत्रतद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वेसतितद्रूपावच्छिन्नसाधनाव्यापकत्वंअनुगतंलक्षणंवाच्यंनतुतद्रूपावच्छि
न्नतत्साधनव्यक्त्यव्यापकत्वं।अननुगमात्तथाचद्रव्यत्वावच्छिन्नसमानाधिकरणस्यरूपत्वावच्छिन्नाव्यापकस्यपृथिवीत्वाभावादेरुपाधित्वदुर्वारत्वं।व्यभि
चारित्वेनसाधनविशेषणंतुपदर्शितमेवेतिसंक्षेपः।उपाधिलक्षणेसाधनाव्यापकत्वेनविशेषणं।दूषकतायामनुपयोगात्।अव्याप्तिकरत्वाच्चेति।
तत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रेतपक्षप्रतिकेचिदिति।साध्यतावच्छेदकावच्छिन्नसाध्यंचनोपाधिनैपर्यवसानद्रूपव्यः।साध्या

विशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्यैव प्रवृत्त्यर्थात्। अनिश्चये च तस्याप्योगात्। संदिग्धोपाधित्वेनापि न तदुद्भावनमित्याहुः अनुमितीति। हेतौ साध्य
व्यभिचारसंदिग्धत्वेत्युक्तं संदिग्धोपाधिना असंदिग्धव्यभिचारकत्वे तस्य संदिग्धोपाधित्वमिति तु तत्त्वं हि तु व्यभिचारेति। व्याप्यसंशयस्य व्यापकसंशयहेतुत्वा
दिति भावः। न च तत्र मानाभावः। कोटिस्मरणादि तदेव तत्र दुष्प्रज्ञैः। क्वचित्तद्विधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यस्य गृहीतत्वेन
तत्स्मरणादेवोपस्थितत्वात्। तादृशहेतुतत्संशयात् व्यापकसंशयस्याभावात्। दिति वाच्यं महानसे हेतावनाकले द्रव्यत्वादि इतिस्मरणात् पर्वतादिकमपि
तो धूमादिसंशयमात्राभावात् तदाहितसंशयाभावाभावदर्शनात्तस्यापि तद्धेतुत्वात्। अतएव तत्र कोटिकव्याप्यसंशयाद्व्यापकस्याप्येकतत्कोटिकसंश
यः। कारणे कार्ये कार्यसमानेत्यादि सूत्रं तदुपलक्षणपरं तत्रत्यः चकारो वाऽनुक्तसमुच्चयार्थ इति वदन्ति। कोटिद्वयसहचरितधर्मवत्ताधर्मि
ज्ञानं हेतुर्धर्मस्यैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात्। अतएव गगने च लिंगसंदेहः। लैंगिकतदभावसहचरितो लिंगतदभावो धर्मिणि तथा च सा
धारणधर्मदर्शनात् संशयो भवतीति न्यायः। लिंगतदभावयोः प्रत्येकमेकैककोटिसाधारण्येपि मिलितयोरसाधारण्यात्। अत एव पक्षस्यले वह्निधूमयोरेव हेतोरितिटी
काकारानुपपत्तिः। इत्थं च साधनाव्यापकत्वसंदेहे साध्यव्यापकव्यभिचारसंदेहात् साध्यव्यभिचारसंदेहो हेतौ स्फुट एव साध्यव्यापकत्वसंदेहे तु साधना
व्यापकव्याप्यत्वसंदेहात् साध्ये साधनाव्यापकत्वसंदेहो बोध्यः। उपाधेः साध्यव्यापकत्वसंदेहे नाहितात् साधने साध्यव्यापकव्यभिचारसंदेहात् साध्यव्यभिचा
रसंदेहः। इत्थमेव च दलद्वयसंशयस्थले साध्यव्यभिचारसंशयस्योक्तिसंभवे इत्यपि केचित् उभयेति। एकांशे हि पक्षस्यैकविशिष्टापरसाध्यतापत्तेरेकस्यो
पाधित्वमिति तत्त्वं। इत्थं चेति। वस्तुतः संदेहात्वपि तत्त्वाग्रहदशायामुपाधिसंदेहे न व्यभिचारसंदेह इति भावः। संदिग्धेति। न चानैकान्तिकत्वसंदेहः प्रतिबंधको

न तु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यं। अनैकान्तिकत्वसंशयान्मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण वाच्ये हेतुदोषत्वेनासाधकताघापक
तया जिज्ञासादिद्वारा परपक्षसंदेहोपयोगित्वेन च तदुद्भावनस्य सांप्रदायिकत्वात्। उपाधित्वस्य संशये निश्चये चाऽजापमानं पद्धानमनुमितिं विरुणद्धि
तदेवास्य दूषकताबीजं तदभिप्रायेणाह। संदिग्धेति। तद्व्यतिरेकस्य क्वचित्व्याप्यत्वेन क्वचिद्व्यपक्षधर्मत्वेन संदिग्धत्वात् न तु बाधेऽवतीर्णे तत एव हेतो
रसाधकतोक्तेरनुपाधिना। यथा साधारण्यं पक्षस्यैव सपक्षत्वात्। अनवतीर्णे तु नोपाधित्वं पक्षेतरत्वं तस्य साध्यव्यापकताया बाधग्रहात् अनुकूल
तर्काद्विपक्षे कथंचित्कूटहेतुनासाधारण्यं व्यतिरेकितया अन्वयव्याप्तिग्रहस्य सत्वात् तिपक्षरूपं तथा च सत्यापि पक्षांतरस्य किंचित्करत्वादिस्य च एतह्रपक्षतानिश्चे
ति पक्षेतरद्वहद्व्याप्यां तदभावमहासंभवादिति भावः। व्याप्तिविरहरूपतां। निरस्यव्याप्तिज्ञानाभावद्वारकतां निरस्यति नापीति। अनौपाधिकत्वज्ञानस्य औपाधि
कत्वज्ञानाभावस्य कारणविघटकतया कारणाभावरूपतादशायां नविषयतया। अनौपाधिकत्वज्ञानस्य कारणत्वेनान्वयव्यतिरेकसिद्धत्वं तु सोपाधित्वज्ञा
नस्य प्रतिबंधकतायाविनाकारणीभूतज्ञानविघटनमसंभवित्वेन कल्पनीयं। सेव त्वसिद्धेति दूषणतात्पर्याद्या अजमेव साधीय इत्यपि वदंति। व्याप्यत्वा
सिद्धव्याप्यत्वज्ञानेऽन्तर्भावस्तद्वारा दूषकत्वं भिन्नधर्मिकत्वं परिहरन्नाह न चेति। नहीति। विरोधिविषयत्वाभावेन साक्षात्प्रतिबंधकत्वासंभवादिति भावः
साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव वस्तुगतिः। तस्मादित्यादेर्दूषणत्वेति शेषः। दूषकताबीजचिंतनमिति। निश्चयदशायामुपाधिद्व
यापत्तिश्चयदशायामुपाधित्वनिश्चयस्य दूषकत्वं तत्संशयदशायां तत्संशयस्यापि तथात्वमिति भावः। व्यभिचारज्ञानद्वारेति। ज्ञानमत्र व्यभिचारनिश्चयेऽउपाधिज्ञा
नविशेषदर्शनत्वेनोपयुज्यते व्यभिचारानुमानं पुनरग्रे वक्ष्यति। व्याप्तीति। साध्यसंबंधितावच्छेदकरूपविरहश्च साधनतावच्छेदके साध्यसंबंधितानवच्छेदकत्व

पर्यवसन्नः साध्यवदन्यावृत्तित्वाविशिष्टसाध्यवद्वृत्तित्वविरहो वेत्यर्थः। ननु स्वसमानाधिकरणत्वं साभावप्रतियोगिसाध्यकत्वं। तत्त्वस्यानुग
तस्याभावे न तत्र तत्साधनपर्यवसानेन साध्यप्रसिद्धिमात्रेणोपहमार्थत्वात्। साध्यव्यापकोपाधिव्यभिचारेण हेतोः साध्यव्यभिचारित्वं साधनाव्यापकोपा
धिव्याप्यत्वेन साध्ये साधनाव्यापकत्वस्य [illegible]पमितिनव्याः। व्यतिरेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधेः साधनाभाववद्वृत्तित्वं व्यभि
चारास्फुटत्वदशायां उपाधिस्मरण[illegible]धिकरणे हेतोः साध्यव्यभिचारित्वं तदीयपक्षधर्मेनास्य साध्याव्यापकताग्रहे [illegible] उपाधिमात्रेणैव तेनापि व्यभिचारि
त्वानुमानेन तत्रापि च तथाविधोपाधिसंभवादिति भावः। वस्तुतस्तु व्यापकव्यभिचारित्वाव्याप्यव्यभिचारित्वे व्याप्यव्यापकभावव्याघातापत्त्या हेतोः साध्य
व्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति। अव्यक्तीति। व्याप्यत्वाभावस्य साधनवृत्तिप्रायेण। साधनाव्याप्यत्वस्योपाधित्वे न च दोषः
साधनेति। यथाश्रुताभिप्रायेण। प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्यैकस्य च तथात्वासंभवात् नायं दोषः एवं च सत्त्व
निपक्षे निश्चितोपाधिवत्संदिग्धोपाधिरुद्भाव्यः। न च तत्कृतं व्यभिचारसंदेहस्य प्रतिहेतुसत्प्रतिपक्षादेरेव सिद्धेः किं तेनेति वाच्यं परस्परविरोधेनैवानुमित्य सं
नुत्पादेन व्यभिचारसंदेहस्यावश्यकत्वे तन्मानाभावात्। उपाधिसंदेहाद्धि विपक्षसाध्यव्यभिचारसंदेहे न तुल्यबलत्वाभावात्। न चातुल्यबलेन सत्प्रति
पक्षो व्यभिचारादिशंकाधानं वा। वस्तुतः संदिग्धव्यभिचारादिनापि तथात्वप्रसंगादिति। अत्र केचित् उपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकतया न कं
दिसाचिव्यादपि केवलत्वे च वाधोन्नायकतया दूषकत्वं। व्याप्त्यादिप्रतिसंधाने तदुन्नयनस्य ततोऽनुमितिप्रतिरोधस्य दुर्वारत्वात्। परं तु न सार्वत्रिकत्वं
तस्येति ध्येयं। असाधारणविपर्यय इति। इदं सत्प्रतिपक्षोन्नायकत्वमभिप्रेत्य यद्यपि व्यतिरेकिणा सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्यारोपत्वानेहासा

रा म.

धारणायं दोषाय तत्रापि सत्प्रतिपक्षोन्नयनोपकस्य साध्यव्यापकत्वग्राहकप्रमाणाभावेनान्यथा। तदयं निष्कर्षः। यत्र यद्धेतोरुन्नायकतया दूषकत्वमुपा
धेस्तत्र तद्धेतून्नयनोपयिकरूपवैकल्यमेवाभासत्वप्रयोजकं। एवं च यत्र स्थापनायां पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या। तत्र पक्षाव्या
पकविपर्ययस्याभासत्वं नहि दहेनापि एकदेशे सत्प्रतिपक्षेऽप्येकदेशान्तरे साध्यसिद्धेः प्रसहत्वात्। तत्र तु पक्षतावच्छेदकावच्छेदेन तथा तत्र तादृशस्योपा
धित्वमेव। एकदेशे प्रतिपक्षस्यापि तादृशासिद्धिविरोधित्वात्। साध्यविपर्ययस्याभासत्वमनुपाधित्वप्रयोजकं न त्वज्ञाने। अज्ञातस्यापि तस्य व्यापकव्यतिरेके
णासिद्धिसंभवात्। पूर्वसाधनव्यतिरेकस्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतं वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावेनन्यभावस्योपाधिता
यां धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्न्यार्द्रेन्धनस्यानुपाधितायाः प्रसंगात्। परं तु पूर्वसाधनव्यतिरेकस्य प्रतिहेतावुपाधित्वे नेष्टावने
सत्प्रतिपक्षमात्रमुच्छिद्येत तस्य वैत्वतत्संभवात्। आभासत्वेऽपि स्थापनायां विशेषग्रहदशायामेव सत्प्रतिपक्षोपन्यासात्। वस्तुतः साध्यव्यापकस्यापि
पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहादुपन्यासासंभवात्। अतो बलवत्तरानुकूलतर्कं विना पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथक
समयाचारादेवासावनुपाधित्वेनोपन्यस्यत इति। यथा अकर्तृकत्वेति। कादाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेतावित्यर्थः॥ अनुमितिलिङ्ग
शोककार्यानुकूलत्वसंसर्गस्य पक्षधर्मिता निरूपयिष्यमाहव्यातीति। संदिग्धेति। यत्र साध्यस्य यादृशसंबंधावगाहिनिश्चयविरहोपि संशयस्तत्र स तादृश
संबंधेन साध्यानुमितौ पक्षत्वं तेनेत्यर्थः। तेन तन पक्षसाध्यविरोधकसंशयानतु गमः। न वा संबंधांतरेण संदेहविनिर्णीतसंबंधेन पक्षत्वं न वा गमः। वृत्तित्व
समवायेनाकाशादिसाधने तद्धेतुकल्पांशस्य पयोग्यता विरहयति। नापीति। साधकबाधकमाने सिद्धिवाधौ केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधी

देवस्तुत्वमो वाधः । नतु तत्रापि पुनरनुमितेः ॥ ततः परामर्शो नियंस्मरणात्मका ह्यापरामर्शादनुमितीष्टसाधनताविषयकादनुमितेः । ततोनुमितिरिति
फलुवंला कल्पनीयमित्यत आह ॥ विशेषविषये ति । न चानुमितिनिके छेवपक्षता सा च कचित्तच निश्चेवसर्वं त्रेष्वपनिश्चे वस्तुत्वमेति वाच्यं । तस्यानित्यत्वेन
सिद्धौ सत्यामपि पक्षताप्रसंगात् । न च तत्सामानाधिकरण्यकत्वं । तद्विनत्ययोग्यतानपाद्यात्रतत्रुपधानेन अनुमितेः पूर्वं तदभावात्तत्सामग्रीसमवधाने
। कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसंगात् शेषवैयर्थ्यात् तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वेकस्यैवमात्रापाता च । विशेषापि
षेति । यत्रानुमित्सानन्तरं साध्यव्याप्यवत्त्वविशिष्टपक्षस्मरणं । अनुमितीष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा अनुमित्सापूर्वकालोत्पन्न
विशेषणस्मरणाद्वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात्साध्यव्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं चानुमितिस्तत्र पक्षतासंपन्नेयेतदहत्कं तत्सा
ध्यकमानविशेषणं । विशेषविषया च तत्साध्यविशिष्टतत्पक्षविषयकप्रकारिकानुमितिविषयिणी इच्छा । यत्किंचिदिच्छा चरं तावानं ज्ञायतामितीच्छायामेपि सिद्धिसत्वे
नुमित्स्यतत्वादनुमितिताप्रकारिकायामपि सत्तायातिरिक्तः पूर्वं तदेवह्निशानं ज्ञायतामितीच्छायां पक्षसाध्यनन्तरमनुमित्सादाच्च । यादृशयादृशेच्छासत्वे
सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणतादिच्छाया अननुगमेपि न क्षतिः । धूमेनानुमिनुयामित्यादौ यामालोकपरामर्शादसत्यामपि सिद्धौ प
दिनानुमितिस्तदा तदन्यमात्रलिंगकसिद्धौ च्छानुमिनीजित्तासादि वह्नि एवं कप्रतिबंधिका । यदि च तत्रानुमितिस्तदापि सिद्धिसत्वे तत्रानुमितेर्वारणाय तल्लिं
गकानुमितीच्छा तदन्यमात्रलिंगकानुमितीच्छाविरहकाच्चा । लिंगविशेषेणापि निवेशनीयं पक्षत्वा । तल्लिंगकानुमितौ सिद्धिकालीन
तल्लिंगकानुमितीच्छाविशेषविरहविशिष्टान्यलिंगकानुमितीच्छैव बाधप्रतिबंधिका । साध्यकमानं साध्यवत्त्वनिश्चयः । पाषाणमयत्वादिनापर्वते तेजः

त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तत्र वह्नित्वेन च तस्यानुमितेर्धर्मित्वसाध्यत्वयोरवच्छेदकावश्यवेद्यानीयो । यदि च पर्वतत्वसामानाधिकरण्येन
एकत्र साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरनुभविकी तदा धर्मविशेषोपि निवेश्यो नान्यथा पक्षतावच्छेदकस्य सामानाधिकर
ण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन साध्यसिद्धेस्तत्सामानाधिकरण्यमात्रेणानुमिति
प्रति तु सिद्धिमात्रस्य विरोधित्वं । इत्थं च लिंगभेदन्यायोप्यनुसरणीयः । साध्यविशेष्यकसिध्यनंतरं पक्षविशेष्यकानुमितेः सामान्यकत्वेनाप्रतिपक्षाविशे
ष्यकेव सिद्धिर्विरोधिनी । एवं च पक्षविशेष्यकसिध्यनंतरमपि साध्यविशेष्यकानुमितिर्जायते तु स्यन्यायात्समानाकारकसिद्धेः प्रतिबंधकत्वे पर्यवसाना
त्तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा । अत एव प्रसिद्धसाध्यकत्यलेपक्षविशेष्यकेवानुमितिरनुभूयते इति । अत्र च व्यासिस्मरणादि
नापूर्वानुमित्सानाशोपरामर्शकाले च सिद्धिसत्वेऽनुमित्सांतरोत्पत्त्यैवानुमितिस्तत्त्वैव कारणीभूतस्य विशिष्टाभावस्य संपत्तेरित्युपाध्यायाः । अन्ये तु द्वि
त्रिक्षणांतरितायामप्यनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्या । सा च न स्वोत्पत्त्यनंतरस्वविषयसिध्युत्पादः । अनुमित्सोत्तरं मनसानुमित्सत
त्वादेरिव सादिविलंवेनेंद्रियादिनानिर्णीतेपि साध्ये लिंगपरामर्शादनुमितिप्रसंगात् । किंतु अनुमित्सानंतरं लिंगदर्शनादिक्रमेणायावत्काले नोत्सर्गतः प(रा)
मर्शो जायते तावानेव कालः फलवत्त्वेन तथा कल्पनात् । अथवाऽनुमित्सोत्पत्त्यनंतरमनुमित्सानाशेपि सिद्धेः सत्त्वाभावकालमध्येऽनुमितिर्जायते तावा
नेव कालोऽनुमित्सायोग्यताशालिनः । यदि च सिध्यनंतरं तन्नाशेपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्स्यतत्वादोऽनुभवसिद्धस्तदा सिध्यापि तावानेव स
मय उपलक्षणीयः । विशिष्यक्षणानियमत्वं वह्निनैः करणीय इति वदंति । अत्र च पत्र साध्यनिर्णयेच्छानंतरं पूर्वोक्तन्यायेन साध्यव्याप्यविशिष्टपक्षस्य पक्ष

स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्मेतादृशव्याप्यधर्मान्तरविशिष्टपक्षस्य तत्पक्षकतत्साध्यतद्व्याप्यवत्तानुमित्योरिष्टसाधनतायाश्चैकं स्मरणं
। तत्र तत्पौरुषमित्स्यात्ततः साध्यतद्व्याप्यवत्तानुमितिस्तत्र तदन्यतरमनुमितित्वसंगः। योग्यतावृत्त्वक्षणेच समानप्रमेयेतितिदृक्षाविषयसिध्य
नुपहितत्वं तद्विवरणं। पक्षता ध्यभेदेन च पक्षतायामेदात्त्वत्कृत्वयोगे वकार्यकारणभावः। तथा च पत्र सिषाधयिषा तन्त्रं कदाप्यनुमितिर्न जाता त
त्रसिद्ध्यभावमात्रं कारणं न तु तत्रेच्छानिवेशो पिगौरवात् योजनाभावाद्यानेन पक्षप्रकपत्साध्यकानुमितौ कस्यापीच्छान जातातत्रो किं साध्या
रोपमात्रं संपादनायेच्छाश्वेच्छानिवेशनायासो नोपादेयः। यत्तु सिषाधयिषाविरहविशिष्टस्य क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकर्मिवाया
सिद्धिः सिषाधयिषाविरहविशिष्टा सापात्तस्या अभावः पक्षता। अपनतौ पक्षताव्यवधायकद्वितीयक्षणएवाव्यवहितत्वपर्यवसानात्पत्रा विरल
क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासंपत्तये द्वितीयः सिषाधयिषाविरहो विशेषणमक्ष्म सिद्धेः। आद्यमिकस्तु स्वक्षण स्व
किमर्थमितिचेद्यत्र क्रमेण सिषाधयिषाप्रत्यक्षसिद्धिपरामर्शानुमितयस्तत्र पक्षतासंपत्त्यर्थमिति तत्र प्रत्यक्षानुमित्सा नाशकाले पास्त्विकीसि
द्धिः अथ परामर्शस्त्विमितीतत्र पक्षताविरहपसंगात्। अथ प्रथमक्षणमपेक्ष्य द्वितीयक्षणे च द्वितीयमपेक्ष्य तृतीयक्षणाव्यवहितोत्तरत्वं। स्वध्वंसाधिकर
णकालध्वंसानधिकरणत्वे सति स्वाधिकरणको त्वध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं चाद्यं तथा च पत्र क्रमेण सिद्धिसिषाधयिषानु
मितयस्तत्र प्रथमक्षणे पक्षतावारणायोत्तरक्षणस्य विशेषणत्वं प्रथमे विशिष्टानंतद्वितीयंतु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासंपत्तये। पदिछितरिद्या
जनिका सामग्रीपतिबंधात्तनुमितिर्न तदा उनुमित्यव्यवहितपूर्ववर्त्तिसिद्धिमिथस्सिद्ध्यभावमात्रं पक्षतेति चेन्न। तादृशसिद्धीनां तन्नाशकित्वेनाभावकारणं

निरुक्तरूपविशिष्टत्वेन वा। नाद्यः। अनंतकार्यकारणभावप्रसंगात्। नान्त्यः सकलसिद्ध्यावनुमित्साविरहविशेषणादानस्यैवपर्याप्ततया तत्समयसंबंधव्य
क्तीनां तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबंधकत्वप्रसंगाच्च। नान्त्यः। सत्यपि परामर्शे लोकस्याश्वित्सिद्धेरनंतरमनुमितिः कस्याश्चिन्नेत्यत्र नियाम
मकाभावात् अन्यथा कारणतावच्छेदकावच्छिन्नसमाजाधीनकार्योत्पादादिकं कारणतावच्छेदककोटौ निविशते। तथा स्तु स्वोत्पत्तिकालावच्छिन्नत्वविशेषितेन स्व
स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वसमानाधिकरणानुमितिकस्वविषयत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पत्तिकस्वविषयत्वेन स्वक्षणा
व्यवहितोत्तरक्षणानुत्पत्तिकत्वसमानाधिकरणानुमितिकभिन्नस्वविषयत्वेन वा। किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टा
नत्वादिना कारणत्वे स्वाद्व्यवहितोत्तरद्वितीयक्षणे इति नातिप्रसंगः। न चादिमेषु परामर्शोत्पत्तिक्षणे यत्र विरोधिसिध्यादिना शक्तत्वोत्तरक्षणोनुमि
तिर्नस्यात्स्वपरामर्शसत्त्वादिति वाच्यं। अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पत्त्यनादरूपत्ववक्षणादेरतः संस्कारादात्संभवात्संस्कारजन्यत्वेन
स्मृतित्वस्य प्रागेव निर्णीतत्वात्। स्याद्वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणक्षण
वृत्तित्वविशिष्टत्वेन स्वसमानाधिकरणानुमित्युत्पत्त्यनधिकरणक्षणाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबंधकत्वं। तदव्यवहितपूर्वत्वं च तदुत्प
त्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वं। न चात्र प्रथमेपत्र सिद्धात्मकपरामर्शानंतरं सिषाधयिषाया उत्पत्तिकाले तत्प्रत्यक्षस्यापि भ्रमस्य न विनाशो नंत
रं पुनरनुमितिस्तत्र तदुत्पत्तिसमये सिद्धाभावात् तत्सर्वकालीनानां सर्वेषां तादृशपूर्ववर्त्तित्वेनाविरोधितादिति वाच्यं। अनंतरं तत्परिस्पंदमानापरिमितपवना
दिपरमाणुचेतनसंयोगसंतानां तःपातित्वक्ष्णानामविरतमेवोपरमात्। फलानुत्पादप्रसंगेन तादृशकल्पनासंभवात्। कारणान्तरकल्पने गौरवात्। अन्यथा व्य

भिचारसंदेहस्य च कारणत्वग्रहाविरोधित्वात् । उपाधीयं गाववतत्तदात्मकसम्पविशेषसंबंधा एवता दृशपूर्ववृत्तिमिन्नाः भवेदानन्तरूपीयानुमितिं प्रति तन्मदी
यानुमितित्वावच्छिन्नपूर्ववृत्तिक्षणत्वादिना तादृशक्षणवृत्तित्वविशिष्टत्वादिना वा कारणत्वं । तथाचोपमानादेः प्रमाणांतरत्वे मन्दोभवतः अक्षमानांच तथात्वे
सर्वत्रानुमितिसामग्रीसंभवात् । विलीयेत च प्रत्यक्षमकृत्वादिना कारणत्वं वा पक्षत्वादिना च प्रतिबंधकत्वं । अनयैव च रीत्या कार्यांतरेष्वपि स्वस्वसामान्यकारणतानां
प्रतिबंधकानां च तथा प्रसज्येत । अतस्त्वन्न द्वितीयोपि युक्तः तृतीयपक्षस्तु सिद्धेः । सिषाधयिषाविरहविशिष्टसिद्ध्यनुमानातिरिक्तसाधकमानपो
स्थितेरस्याभावः कारणमिति तु केचिन्मतं तन्न । बाधकं हि मानांतरोपस्थितिरूपयोग्यं तदुपहितं तत्सामग्री वा नाद्यः । चक्षुरादिसत्त्वे विनानुमितिसामग्रीमनुमि
त्यभावप्रसंगात् । न द्वितीयः । सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेप्यनुमित्यापत्तेः । अनुमानातिरिक्तत्वस्य वैयर्थ्याच्च । न तृतीयः । अनुमि
तिसामग्र्यभावेन प्रत्यक्षकारणत्वमनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन पुनरनुमितिकारणत्वमित्यन्योन्याश्रयात् । साध्यत्वाभाव
व्याप्यदर्शनस्य तत्प्रतियोगिसाध्यविरहेण भावप्रत्यक्षसामग्री विरहात् पक्षतावत्वेप्युक्तरीत्या पक्षतोतद्भावानुमित्यापत्तेरिसिद्धिकाचित् । यत्तु तत्त
त्वतंत्रान्वयव्यतिरेकशालितासिद्धिप्रमेन प्रथमसमुपस्थितत्वात् लाघवाच्च प्रत्येकमेव तथात्वं । अन्यथा गणादेरप्यवेवानंतमर्गत्वप्रसंगात् । न चानुमित्साविरहस्य
त्वेकविशेषणत्वे गौरवं । शाब्दसिद्धौ सत्यामशाब्दज्ञानेनाप्यवमितीच्छा अनुमिते सत्याः तात्सिद्धावनुमितिविषयके आविरहस्य प्रत्यक्षसामग्रीसत्त्वे च ता
दृशेच्छायामप्यनुमित्सुत्वादात् साधकमानेनानुमितित्वादिप्रकारकेच्छाविरहस्यैव विशेषणत्वापातत्वापि वा व्यत्वात् । स्वनिवृत्तिकप्रत्यक्षादिसाम
ग्रीसमवहितान्यत्वादिना च तादृशेच्छायोरवगमेनीव गौरवं । अन्यतरत्वघटकयोरन्योन्याभावयोर्मिथो विशेष्यविशेषणभावे विनिगमनाभावेना आनति

ष्टस्य समवायेन सिद्धेरभावं कारणमिति तन्मिन्नेन च संबंधेन तज्जन्यसाधारणकारणतापत्तेस्तत्सामग्र्यामपि विशिष्टस्य वह्न्यादेर्वैजात्येन विशिष्टस्य मनोयो
गादेः प्रतिबंधकतापत्तेः । तथा च कथमनुगतरूपेण तयोरभावः कारणमिति । एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यं । एककालावच्छेदेनैकात्म
वृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादेस्तत्सादृशामितिसामग्रीविशेषाभावस्य हेतुत्वेपि सा यथासिद्ध्यभावस्य च पक्षव्यवहारनिमित्तं । एतदेवाभि
संधाय प्रवृत्तिनिमित्तं पूर्वमेतिवक्ष्यति । फलानुपहितसिद्धेर्वाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्थलप्रत्येपि सिद्धसाधनस्थले पक्षव्यवहाराविरहे
णतादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावस्थलप्रत्येपि सिद्धसाधनस्थले पक्षव्यवहाराविरहेणतादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न निविशते गौ
रवात् । विशिष्टसिद्ध्यभावस्य चात्मनिष्ठस्यैवानुमितिहेतुत्वेपि तत्स्वपरंपरासंबंधादेव पर्वतादौ पक्षव्यवहार इति ध्येयं । एकस्य पुंसो नुमित्सासत्त्वेपि अन्यस्य तदु
पहिताः प्रत्यक्षादिसामग्रीसत्त्वेप्यनुमित्युत्पादात् तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साविरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहो ऽनन्यगति
कत्वेन हेतुरूपेणान्य इति वदंति । अथ सिद्धत्वेनानुमितौ सिषाधयिषा हेतुः स्यात् । न चैवं मरणादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः । उत्तेजकानामननुगम
त्वात्तद्भावविशिष्टमण्याद्यभावस्यानंतत्वादिति चेन्न । इहापि दर्शितोननुगमः । सिषाधयिषायाः सिद्धत्वे च अनुमानानुमिति निःचित्तत्वपक्षकं दुर्वचं
सिद्धिस्थितिकालीनां स्वेनैव सिद्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने च विना सिषाधयिषां सिद्धिनाशकालेनुमित्युत्पादो दुर्वारः । एकस्य सिषाधयिषायाः हे
तुत्वे नंतकार्यकारणभावप्रसंगः । अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतो नुमितिसामान्योत्पत्तिप्रसंगः । न हि तदा विशेषसामग्री विना सामा
न्यसामग्र्या अनुमितिजनकत्वं नास्ति । न चान्यत्रापि । न तद्विशेषसामग्र्यंतरमस्ति । न तत्कल्पने चाति गौरवं । इहापि मानाभावसिद्धत्वे तेवसाना । सा च न आप

तेन कारणाभावादिति चेन्न। सामान्यविशेषानुमितिसामान्यं तु स्यादेव। कार्योत्पादस्य विना कारणाभावमसंभवात्। कारणत्वं चापरत्वेनावश्यककारण
भावस्य परामर्शस्य कारणतावच्छेदिका पक्षतानकारणमिति तु भ्रमः। प्रतिबंधकाभावत्वव्यतिरेकशालित्वेन हेतुत्वात्। अन्यथा यथा संभवं
निमित्तकारणस्य समवायिकारणत्वावच्छेदकत्वप्रसंगात्। अथानुमितिसाधारणसिद्धेः प्रतिबंधकत्वे तदभावस्य समवायित्वप्रतिबंधकाभावत्वेन का
र्यकालवृत्तेरेव हेतुतान्। अनुमितिकाले च तदसंभवात्सामान्यं स्यादेवेति चेन्न। पक्षतायां प्राग्भावादेः कार्यसमकालत्वपरिचयप्रतिपक्षितत्वस्यैव तथात्वेन हे
तुत्वं न तु सर्वस्य गौरवात्। अन्यथा समवायिकारणस्य कार्यसहभूतस्यैव हेतुतानापत्तेः। कारणाभावस्य तथात्वे पक्षत्वे प्रामाणिकत्व एव विजयेच्छितो। प्रामाणिक
त्वा। विनाप्यनुमित्साकां चेत्परामर्शानुमितिप्रवाहस्याविरलत्वप्रसंगादभाविकत्वात्। कालभेदकल्पनापि च मानाभावात्। मानाभावाच्च पक्षतानानुमि
तिहेतुः परार्थानुमानेन सिद्धसाधनमर्थात् प्रविधयादूषणमित्याहुः। लक्षणमिति प्रोद्भानेन संगत्या विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति। पक्षेत्यादि। व्याप्ति
स्मरणेति स्मरणत्वमविवक्षितं व्यापकत्वान्। लाघवान्। प्रथमोपस्थितत्वलाघवात्। कल्पनालाघवमाह। परामर्शेति। परामर्शहेतुत्ववादिनाप्यनुमि
तेः पूर्वं तादृशज्ञानमवश्यं मंतव्यं तथा चातिरिक्तधर्मिणं तज्ज्ञानं अन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोः कल्पनामपेक्ष्य उभयवादिसिद्धनियतपूर्ववर्त्तिनोन
न्यथासिद्धत्वमात्रकल्पनालघीयसीति। ननु धूमत्वावच्छेदेन आमेरालोकत्वेन च पक्षधर्मतापाश्रयेप्यनुमितिः स्यादित्यत आह। एवमिति। धूमत्वावच्छेदेन व्याप्ति
ज्ञानं तेनैव रूपेण पक्षधर्मताज्ञानं हेतुरिति नातिप्रसंगः। ज्ञानद्वयादिति द्वित्वमविवक्षितं। लाघवात्। अवच्छेदकलाघवात्। आवश्यकत्वात्। व्याप्यतावच्छेद
कप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुतायां आवश्यकत्वात्। कश्चिदुपजीव्यत्वादित्याह। उपजीव्यत्वं च व्याप्तिज्ञानं विनापद्धर्मावच्छेदेन व्याप्तिज्ञानं

राम०

तत्प्रकारकपक्षधर्मताज्ञानस्यासंभवात्। एवं च सिद्धे व्याप्तिज्ञाने हेतावतिप्रसंगभंगाय पक्षधर्मताविषयकत्वं अवच्छेदकं कल्पते लाघवात्। न
तु कारणतागौरवादिति भावः। सिद्धस्य व्याप्तिज्ञानस्य पक्षधर्मताविषयकत्वमसिद्धमित्याशयेनाह। तत्वेति। यद्वा व्याप्यत्वज्ञानमिति। व्याप्यत्वप्रकारक
पक्षधर्मताज्ञानमित्यर्थः। ननु विशिष्टज्ञानान्यथानुपपत्त्या ज्ञानद्वयस्यावश्यकत्वात्तथात्वस्यैव हेतुत्वं युक्तं तदिदमुक्तं मावश्यकत्वादित्यत आह। उपजी
व्यत्वादिति। विशिष्टज्ञानान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः। स्वसंवेदनसिद्धमेव ज्ञानद्वयमावश्यकत्वं च तत्स्योमपवादिसिद्धत्वं
मित्याशयेनाह। तस्येति। असिद्धिं परिजिहीर्षुराशंकते। अथेति। अयं पक्षवृत्तिः हेतुरिति। लाघवादिति शेषः। अनुमितिसामग्र्या इति। स्मृतिहेतुतावादिनां न
व्यानां मते दूषणमिदं। ननु संस्कारकारणतावादिनां बाधा चामिति। अथेत्यादि। अत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यमानमनंतरं च गृही
ते पक्षे तादृशविशिष्टधीस्तत्रोत्पद्यते। प्रथमतत्रेति। विशिष्टज्ञानात्पूर्वमनुमितिसामग्रीविरहप्रदर्शनाय। एवं च सिद्धे पूर्ववर्त्तिनि विशिष्टज्ञाने तस्येव
तत्वेन हेतुत्वं गुरुधर्मद्वयावच्छेदेनान्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथासिद्धत्वकल्पनापि एवमाप्यत्वात्। शब्दप्रमाणमा
प्यवच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताग्रहप्रकारीभवद्धर्मावच्छिन्नव्याप्तिज्ञानत्वेन वैकरूप्येण कारणत्वे चातिगौरवात्। विनिग
